śrīḥ
śrīmate rāmānujāya namaḥ



# Kriyasagaram

## Volume – 1

### śrī pāncarātra agame

**नित्याराधनविधिः, अग्निकार्यविधिः,**

**वासुदेवपुण्याहवाचन विधिः, महोत्सवविधिः** &

**चक्रब्जमण्डलपूजा विधिः**

**(Sanskrit)**

By:
Sri Pancharatra Agama Vidvan
Therazhundur K.Sriraman Battacharyar,
Sri Pancharatra Agama Samrakshana Sabha,
CG1-214, East Adayavalanjan St,
Srirangam, Trichy - 620-006.
97917-02035
sriramanbattachar@gmail.com
www.kriyasagaram.in

# Index


| | | |
|---|---|---|
| 01 | भगवतः नित्याराधन विधिः | 01 |
| 02 | श्रीवासुदेव पुण्याहवाचन विधिः | 37 |
| 03 | अग्नि कार्य विधिः | 45 |
| 04 | महोत्सव विधिः | 55 |
| 05 | श्रीचक्राब्ज मण्डल पूजाविधिः | 123 |


****************

श्रीः

श्रीमते रामानुजाय नमः

# भगवतः नित्याराधन विधिः

## श्रीपाञ्चरात्रगुरुपरम्पराध्यानम् (प्रार्थना)

ओं वन्दे लक्ष्मीपतिं देवं शङ्खचक्रगदाधरम्।
विद्यामूर्तिं हयग्रीवं शब्दार्थज्ञान लब्धये।
अमृताध्मा तमेघाभममृताहरणं विभुम्।
पाञ्चरात्राऽऽगमाचार्यं वन्देवैकुण्ठभूपतिं.
*नमस्सकल कल्याणदायिने शेषशायिने।
निर्मलानन्दकल्याण निधयेविष्णवे नमः।
*नम स्सकलकल्याणदायिने चक्रपाणये।
विषयार्णव मग्नानां समुद्धरणहेतवे ।
*सुदर्शनाद्याः हेतीशाः पञ्चब्रह्मर्षि रूपतः ।
समुत्पन्नाः क्षितितले पौण्ड्रवर्ध्नस्थलादिषु ।
*पञ्चायुधांशास्ते पञ्चशाण्डिल्याश्चौपगायनः।
मौञ्ज्यायनःकौशिकश्च भारद्वाजश्च योगिनः।
पञ्चापिपृथगेकैक दिवारात्रं जगत्प्रभुः।
अध्यपयामास यतस्ततस्तन्मुनिपुङ्गवाः।
*भगवच्छास्त्रतत्वज्ञं भगवत्पाद संश्रितम्।
वन्दे शाण्डिल्यमाचार्यं पौण्ड्रवर्ध्न स्थलोद्भवम्।
*भगवच्छास्त्रतत्वज्ञं औपगायन देशिकम्।
तोताद्रिसंभवं वन्दे वासुदेव पदाश्रितम्।
*अनन्तपुर संभूतमनेकगुणभूषितम्।
प्रपद्ये भगवच्छिष्यं मौञ्ज्यायन गुरुत्तमम्।
*वासुदेवकृपापात्रं पञ्चरात्रविशारदम्।
मृगस्थलसमुत्पन्नं प्रपद्ये कौशिकं गुरुम्।

*भारद्वाजाख्यमाचार्यं विष्णोःपादाब्ज संश्रितम्।
प्रपद्ये सुगुणांबोधिं सालग्रामाऽचलोद्भवम्।
*पञ्चरात्रार्थतत्वज्ञान् पञ्चसंस्कार शालिनः।
पञ्चाचार्यान् प्रपद्येहं पाञ्चकालिकतत्परान्।
*अनन्तः प्रथमोरात्रः गरुडस्तुद्वितीयके।
त्रितीयरात्रौ सेनेशः चतुर्थं वेधसाश्रृतम्।
रुद्रः पञ्चम रात्रौ तु पाञ्चरात्रं प्रशस्यते।
* इदं महोपनिषदं चतुर्वेद समन्वितम्। साङ्ख्ययोग कृतान्तेन पञ्चरात्राऽनुशब्दिदम्।
वेदान्तेषु यथासारं संगृह्यभगवान् हरिः। भक्तानुकम्पयाविद्वन् सञ्चिक्षेप समन्वितः।
*आगमं भरतं शिल्पं वैद्यं ज्योतिषमेव च। पञ्चशास्त्राणि संयोगात् पाञ्चरात्रं प्रचस्यते।
*लक्षं तु चतुरो वेदाः लक्षं भरतमुच्यते।
शिल्पं लक्षद्वयं चैव चातुर्लक्षं तु ज्योतिषम्।
पंचलक्षप्रमाणेन पाञ्चरात्रं प्रचस्यते।
*लक्षं तु चतुरो वेदाः लक्षं भारतमुच्यते।
शैवं लक्षद्वयं चैव चातुर्लक्षं तु ज्योतिषम्।
पंचलक्ष प्रमाणेन पाञ्चरात्रं प्रचस्यते।
*श्रीशेष पक्षीश्वर पद्मगर्भ सेनेशमुख्यान् प्रतिबोधयन्तम्।
श्रीपाञ्चरात्राऽऽगमाचार्यमाद्यं विष्णुं सदाऽहं शरणं प्रपद्ये।
*लक्ष्मीनाथ कृपावलब्धमहती श्रीपाञ्चरात्राऽऽगमान्।
तत्तद्वैदिक तान्त्रिक प्रणयिनः पूज्याविलासाश्रयान्।
भारद्वाजवदौपगायनसुधी शाण्डिल्यमौञ्ज्यायनान्।
पंचर्षीन् सह कौशिकान् कुलगुरून् वन्दे महायोगिनः।

************************************

श्रीः

श्रीमते रामानुजाय नमः

# समाराधन विधिः

## विश्वरूप कार्यक्रम विधिः

अथ समाराधन विधिः उच्यते । आचार्यः ब्राह्मे मुहूर्ते उत्थाय। नित्यकर्मादिकं कृत्वा। आलयं प्रविश्य। पादौ प्रक्षाळ्य। आचम्य। पूर्वाचार्यध्यानपूर्वकं ध्वजस्तम्भसमीपे साष्टाङ्गं प्रणम्य। जितन्तास्तोत्रपठनेन सह प्रादक्षिण्येन गर्भगेहं प्रविश्य। द्वाराद्बहिः ताताक्ष्र्य चण्डादिभ्यो नमः इति अञ्जलिं कृत्वा। करन्यास अङ्गन्यासपूर्वकं कूर्मादीन् पठित्वा। ओं अङ्गुष्ठाभ्यां नमः। ओं तर्जनीभ्यां नमः। ओं मध्यमाभ्यां नमः। ओं अनामिकाभ्यां नमः। ओं कनिष्ठिकाभ्यां नमः। ओं करतलपृष्ठाभ्यां नमः। ओं ज्ञानाय हृदयाय नमः। ओं ऐश्वर्यायशिरसे स्वाहा। ओं शक्त्यैशिखायै वषट्। ओं बलाय कवचाय हुं। ओं तेजसेनेत्राभ्यां वौषट्। ओं वीर्यायअस्त्राय फट्।

कूर्मादीन् दिव्यलोकं तदनु मणिमयं मण्डपं तत्र शेषम्।
तस्मिन् धर्मादिपीठं तदुपरिकमलं चामरग्राहणीश्च।
विष्णुंदेवीं विभूषायुधगणमुरगं पादुके वैनतेयम्।
सेनेशं द्वारपालान् कुमुदमुखगणान् विष्णुभक्तान् प्रपद्ये।

ओं यं वायवे नमः इति मन्त्रेण ताळत्रयेण सह कवाटमुद्घाट्य। देवव्रतसाम पठन् दक्षिणाङ्घ्रिणा अन्तःप्रविश्य। ओं रं अग्नये नमः इति दीपान् प्रज्वाल्य। ओं नमो भगवतेवासुदेवाय उत्तिष्ठ उत्तिष्ठ इति शयनात् उत्थाप्य। प्रबुद्धत्वं पठित्वा।

प्रबुद्धत्वं जगन्नाथ प्रबुद्धपरमेश्वर।
प्रबुद्ध पुण्डरीकाक्ष भक्तानामनुकम्पय।
त्वयिप्रबुद्ध देवेश तवाग्रे परमेश्वर।
लौकिकानिह यज्ञानि तानि निर्वर्तयाम्यहम्।
अग्रतः सर्व यज्ञानां त्वं प्रभुर्नामतःसदा।

नापरेषु जगन्नाथ पूजितेषु सुरेषु च।
मयि यज्ञसमाप्तिस्स्यात् त्वयि संतर्पितेऽनले।
सर्वेदेवाऽनलमुखाः सचाग्निस्त्वन्मुखे कृतम्।
ब्रह्मास्वयं ब्रह्मलोके स्वर्गेस्वर्ग निवासिनः।
सात्विकाः मानुषेलोके नागाद्याश्च रसातले।
त्वयिप्रबोधयन्त्ये ते स्वार्त संसिद्धये सदा।
त्यज योगमयींनिद्रां कृपांकुरु सनातन।

इति प्रबुद्धत्वं पठित्वा। शयनबेरशक्तिं मूले नियोज्य। पूर्वदिनार्पित गन्धमाल्यादीनि परिहृत्य। सशर्कर नवनीत गोक्षीरं निवेद्य। गो पृष्टादीनि प्रदर्श्य। नीराज्य। पुण्याहं वाचयित्वा। तज्जलेन
ओं सहस्रारहुंफट् इति मन्त्रेण गर्भगेहादि पाकशालान्तं प्रोक्ष्य। दध्यन्नं निवेद्य।
अथ पञ्चशुद्धि विधिः उच्यते।

स्थान शुद्धिं पात्रशुद्धिं बिंबशोधनमेव च।
आत्मनः भूतशुद्धिश्च पञ्चशुद्धिः प्रकीर्तिताः।

तेषु स्थानशुद्ध्यादीनि परिचारकवरेण वा स्वहस्तेन वा कुर्यात्।

## अथ भूतशुद्धिः

आसनस्य मेरुःपृष्ठ ऋषिः। अतलं छन्दः। कूर्मोदेवता। आसने विनियोगः। ओं पद्मासनाय नमः। ओं भद्रासनायनमः। ओं विमलासनाय नमः। ओं कूर्मासनाय नमः। इत्यभ्यर्च्य। त्रिदर्भकृतकूर्चं आसने निक्षिप्य। तदुपरि उपविश्य। ऋजुकायत्वाः योगमुद्रां योगसंपुट मुद्रां तत्वमुद्रां च प्रदर्श्य। ओम् ओम् ओम् इति श्रोत्राचमन पूर्वकम्.

ओम् नारायणाय विद्महे वासु देवायधीमहि.
तन्नो विष्णु: प्रचोदयात्. इति प्राणानायम्य.

अस्य देव देवस्य भगवतो वासु देवस्य श्रीभूमि नीळा हेमाब्जनायिका समेत श्री देवाधिराज स्वामिसन्निधौ नित्याराधनाङ्गं भूतशुद्ध्यादि मानस यागान्तम् करिष्ये ।

इति सङ्कल्प्य।

ओम् यम् नमःपराय देह पाप्मानम् शोषयामि.

ओम् रम् नमः पराय दाहयामि. ओम् वम् नमः पराय

प्लावयामि. ओम् लंनमः पराय स्तंभयामि.

एवंशोषणादिभिः शरीरम् शुद्धम् भावयेत् ।

एवम् पृथिव्यादि पञ्च भूतानाम्, विधातृ, सिन्धुद्वीप,काश्यप, किष्किन्ध, परब्रह्म ऋषयः । गायत्री, अतल, त्रुष्टुप्, जगति, गायत्री छन्दागुम्सि. ओम्, हुम्, वम्, रम्, यम्, षम्, बीजानि। वराह, वरुण,अनल, वायु, अनिरुद्धा देवता:। तत्व सम्हारे विनियोगः ।

घ्राणोपस्थेन्द्रियान्विताम् पृथ्वीम् गन्धे विलापयामि

इति पादादि जान्वन्तम् ।

पायु रसनेन्द्रिय युताः अपः गन्धंच रसे विलापयामि

इति जान्वादि गुह्यान्तम् ।

दृष्टि चरणेन्द्रिय धृतम् वह्निं रसंच रूपे विलापयामि

इति गुह्यादि नाभ्यन्तम् ।

त्वक्करेन्द्रियाश्रितम् वायुम् रूपंच स्पर्शे विलापयामि

इति नाभ्यादि नासान्तम् ।

वाक् श्रुति धरम् आकाशम् स्पर्शंच शब्दे विलापयामि

इति नासादि मूर्धान्तम् सम्हरामि।

शब्दं मनसि विलापयामि।

मनः अहंकृतौ विलापयामि।

अहंकृतिम् बुद्धौ विलापयामि।

बुद्धिम् प्रकृतौ विलापयामि।

प्रकृतिम् जीवे विलापयामि ।

इति हृत्स्थानम्. सम्हार मुद्रया स्पृष्ट्व।

जीवम् सुषुम्णया ब्रह्मरन्द्रच्छेदन पूर्वकम् रवि मण्डल द्वारा भगवद्दक्षिण चरणे

नियोजयामि. इति कुम्भकेन नाभिकन्दात् नियोज्य.

भगवद्धाम पादाङ्गुष्टात् चंद्रमण्डल द्वारा ब्रह्मरन्द्र प्रविष्टम् जीवम् नाभिकन्दे ध्यायामि.जीवात् प्रकृतिम् सृजामि. प्रकृते: बुद्धिं सृजामि.बुद्धे: अहंकृतिम् सृजामि. अहंकृते: मनस:सृजामि. मनस: शब्दंसृजामि.

एवम् आकाशादि पञ्च भूतानाम् परब्रह्म,किष्किन्ध, काश्यप, सिन्धुद्वीप, विधातारो ऋषय: । गायत्री, अतुल, त्रुष्टुप्,जगति, गायत्रीछदांगुंसि।

ओम्, षम्, यम्, रम्, वम्, हुम्, बीजानि । अनिरुद्ध, वायु, अनल, वरुण,वराह देवता:। तत्व सृष्ट्यर्थे विनियोग:।

शब्दात् वाक्श्रुति धरम् आकाशं स्पर्शंच सृजामि इति मूर्धादि नासान्तम् ।

स्पर्शात् त्वक्करेन्त्रियाश्रितम् वायुंरूपं च सृजामि इति नासादि नाभ्यन्तम् ।

रूपात् दृष्टि चरणेन्द्रिय धृतम् वह्निं रसंच सृजामि इति नाभ्यादि गुह्यान्तम् ।

रसात् पायु रसनेन्द्रिय युता: अप: गन्धंच सृजामि इति गुह्यादि जान्वन्तम् ।

गन्धात् घ्राणोपस्थेन्द्रियान्विताम् पृथ्वीं सृजामि इति जान्वादि पादान्तम् ।

सृष्टिमुद्रया स्पृष्ट्वा । त्रिविक्रम पदांबोजात् विनिसृताऽमृतेन आत्मानम् अभिषेचयामि । स्व देहं अप्राकृत दिव्यभूतमयम् ध्यात्वा । इति भूतशुद्धिम् कृत्वा ।

ओम् अङ्गुष्टाभ्याम् नम:, ओम् तर्जनीभ्यां स्वाहा, ओम् मध्यमाभ्याम् वषट् ।

ओम् अनामिकाभ्यां हुम्, ओम् कनिष्टिकाभ्यां फट्;ओम् नखमुखैवौंषट् ।

ओम् कूर्मादीन् दिव्य लोकम् तदनु मणिमयंमण्डपम् तत्र शेषम्।

तस्मिन् धर्मादिपीठम् तदुपरिकमलम् चामर ग्राहिणीश्च॥

विष्णुम् देवीम् विभूषायुधगण मुरगम् पादुकेवैनतेयम्।

सेनेशम् द्वार पालान् कुमुद मुखगणान् विष्णुभक्तान् प्रपद्ये॥

इति प्रार्थ्य।

## द्वादशाक्षर न्यास विधि:

अस्य श्री द्वादशाक्षर महामन्त्रस्य.श्री वासुदेवो भगवान् ऋषि: .देवि गायत्री छंदः परमात्मा वासुदेवो देवता.अं बीजम् ,क्रोम् शक्ति:श्वेतो वर्ण: बुद्धि:तत्वम् परमव्योम क्षेत्रम्,भगवत् समाराधनार्थे जपे विनियोग:

### कर न्यासः

| | |
|---|---|
| ओम् ओम् ओम् | ओम् तेम् ओं |
| ओम् नम् ओम् | ओम् वाम् ओं |
| ओम् मोम् ओम् | ओम् सुं ओं |
| ओम् भम् ओम् | ओम् दें ओं |
| ओम् गम् ओम् | ओम् वाम् ओं |
| ओम् वम् ओम् | ओम् यम् ओम् |
| दक्षिण कर तल मारभ्य | वाम कर तल मारभ्य |
| कनिष्ठान्तम् पर्वसु न्यसेत्. | कनिष्ठान्तम् पर्वसु न्यसेत्. |

### देह न्यास:

| | |
|---|---|
| ओम् सुम् ओम् | अङ्गुष्टकनिष्टिकाभ्याम् नाभौ। . |
| ओम् देम् ओम् | अङ्गुष्ट तर्जनीभ्याम् गुह्ये। |
| ओम् वाम् ओम् | अङ्गुष्टम् विना जान्वो:। |
| ओम् यम् ओम् | सर्वाङ्गुलीभि: चरणयो:। |
| ओम् ओम् ओम् | अङ्गुष्टेन शिरस:पूर्वभागे |
| ओम् नम् ओम् | तर्जन्या शिरस:दक्षिणे। |
| ओम् मोम् ओम् | अनामिकया पश्चिमे। |
| ओम् भम् ओम् | कनिष्टिकया उत्तरे। |
| ओम् गम् ओम् | मध्यमया मूर्धिमध्ये। |
| ओम् वम् ओम् | अङ्गुष्टअनामिकाभ्यां मुखे। |
| ओम् तेम् ओम् | तर्जनीमध्यमाभ्याम् नेत्रयो:। |

| | |
|---|---|
| ओम् वाम् ओम् | अङ्गुष्टतर्जनीभ्याम् हृदये। |
| ओम् ओम् ओम् | ज्ञानाय हृदयाय नमः। |
| ओम् नम् ओम् | ऐश्वर्याय शिरसे स्वाहा । |
| ओम् मोम् ओम् | शक्त्यै शिखायै वषट् । |
| ओम् भम् ओम् | बलाय कवचाय हुम् । |
| ओम् गम् ओम् | तेजसे नेत्राभ्याम् वौषट् । |
| ओम् वम् ओम् | वीर्याय अस्त्राय फट् । |
| ओम् तेम् ओम् | उदराय नमः। |
| ओम् वाम् ओम् | पृष्टाभ्याम् नमः । |
| ओम् सुम् ओम् | बाहुभ्याम् नमः । |
| ओम् देम् ओम् | ऊरुभ्यां नमः । |
| ओम् वाम् ओम् | जानुभ्याम् नमः । |
| ओम् यम् ओम् | पादाभ्याम् नमः । |

| | |
|---|---|
| ओम् किरीट मुद्रायै नमः | शिरसि । |
| ओम् श्रीवत्स मुद्रायै नमः | दक्षिणोरसि । |
| ओम् कौस्तुभ मुद्रायै नमः | वामोरसि । |
| ओम् वनमाल मुद्रायै नमः | कण्ठे । |

ओम् चक्र मुद्रायै नमः। ओम् पद्ममुद्रायै नमः दक्षिण भागे।

ओम् शङ्ख मुद्रायै नमः । ओम् गदा मुद्रायै नमः वाम भागे।

ओम् अनन्त मुद्रायै नमः । ओम् गरुड मुद्रायै नमः । विष्वक्सेन मुद्रायै नमः पादाग्रे।

## द्वादशाक्षर ध्यानम्

चतुर्बाहु मुदाराङ्गं सर्वलक्षण लक्षितम्।
शुद्ध स्पटिक वर्णाभम् अयुतेन्दु समप्रभम्।
चारुहासम् सुताम्रोष्टम् कर्णान्तायतलोचनम्।

निर्धूत पद्म रागाभम् दन्तछविसुशोभितम्।
महोरस्कम् महाबाहुम् प्रसन्नेन्दुनिभाननम्।
सुभ्रू ललाटम्सुमुखम् घनकुञ्चित मूर्धजम्।
तटिछत सहस्राभम् पीत निर्मल वाससम्।
पाणिपादतलांभोजम् पुण्डरीकायतेक्षणम्।
श्रीवत्साङ्गं किरीटादि सर्वाभरण भूषितम्।
पद्म चक्र गदा शङ्खधारिणम् कौस्तुभोरसम्।
दिव्यगन्धविलिप्ताङ्गं दिव्यमालाविभूषितम्।
शेषाहिभोगे विपुले सुखासीनम् चतुर्मुख।
श्री भूमि सहितम् देवम् ललाटेश्वेतमृत्स्नया।
कृतोर्ध्वं पुण्ड्रतिलकम् मण्डितम् चण्ड भानुभिः।
नियुतै रयुतैश्चन्द्रैः विद्युत्कालाग्निकोटिभिः।
समवेतैरिवैकत्र तेजःपुञ्जैः विसर्पिभिः।
भ्राजमानंदुरालोकम् देहमण्डल निर्गतैः।
भासयन्तंजगत्सर्वम् ध्यायेत् प्रक्षीण कल्मषः।
सितम् कृष्णंच धूम्राभम् श्यामंतारानिभं तथा॥
स्पटिकाभंच शङ्खाभम् रक्तम् शुक्लं च लोहितम्॥
तमोरूपम् पीतवर्णम् ध्यात्वा मन्त्रद्वयाक्षरम्। इति ध्यात्वा ।

****************************

## अष्टाक्षर न्यास विधिः

अस्य श्रीमदष्टाक्षर महामन्त्रस्य । अन्तर्यामी नारायण ऋषिः,देवी गायत्री छन्दः, परमात्मानारायणो देवता, अम् बीजम्, आयः शक्तिः, मम् कीलकम्, परमव्योमक्षेत्रम्, बुद्धिःतत्वम्, शुक्लादि वर्णः, उदात्तादि स्वरः, भगवत्समाराधनार्थे जपे विनियोगः।

## करन्यास:

| | |
|---|---|
| ओम् ओम् ओम् | ओम् राम् ओम् |
| ओम् नम् ओम् | ओम् यम् ओम् |
| ओम् मोम् ओम् | ओम् णाम् ओम् |
| ओम् नाम् ओम् | ओम् यम् ओम् |
| दक्षिण तर्जनीमारभ्य | वाम तर्जनीमारभ्य |
| कनिष्ठान्तम् पर्वसुन्यसेत्। | कनिष्ठान्तम् पर्वसुन्यसेत्। |

## अथ देह न्यास:

| | |
|---|---|
| ओम् राम् ओम् | अङ्गुष्ट कनिष्टिकाभ्याम् नाभौ । |
| ओम् यम् ओम् | अङ्गुष्टम् विना सर्वाभिर्मेहने । |
| ओम् णाम् ओम् | तथैव जानुनि । |
| ओम् यम् ओम् | समस्ताङ्गुलीभिः चरणयो:। |
| ओम् ओम् ओम् | मध्यमया मूर्ध्निमध्ये। |
| ओम् नम् ओम् | तर्जनी मध्यमाभ्याम् नेत्रयो: । |
| ओम् मोम् ओम् | अङ्गुष्टानामिकाभ्याम् मुखे । |
| ओम् नाम् ओम् | अङ्गुष्ट तर्जनीभ्याम् हृदये । |

| | |
|---|---|
| ओम् क्रुद्धोल्काय स्वाहा | ज्ञानाय हृदयाय नम: । |
| ओम् महोल्काय स्वाहा | ऐश्वर्यायशिरसे स्वाहा । |
| ओम् वीरोल्काय स्वाहा | शक्त्यै शिखायै वषट् । |
| ओम् विद्युल्काय स्वाहा | बलाय कवचाय हुम् । |
| ओम् सहस्त्रोल्काय स्वाहा | तेजसे नेत्राभ्यां वौषट् । |
| ओम् तेजोल्काय स्वाहा | वीर्याय अस्त्रायफट् । |

| | |
|---|---|
| ओम् किरीट मुद्रायैनम: | शिरसि |
| ओम् श्रीवत्स मुद्रायैनम: | दक्षिणोरसि |

ओम् कौस्तुभ मुद्रायै नमः वामोरसि

ओम् वनमाल मुद्रायै नमः कण्ठे

ओम् चक्र मुद्रायैनमः,ओम् पद्म मुद्रायै नमः दक्षिण भागे।

ओम् शङ्ख मुद्रायै नमः,ओम् गदा मुद्रायै नमः वाम भागे

ओम् अनन्त मुद्रायै नमः,गरुड मुद्रायै नमः, विष्वक्सेन मुद्रायै नमः पादाग्रे

## अष्टाक्षर ध्यानम्

चतुर्भुज मुदाराङ्गं चक्राद्यायुध सेवितम्।
काळमेघ प्रतीकाशम् पद्मपत्रायतेक्षणम् ॥
पीतांबरधरम्सौम्यम् प्रसन्नेन्दुनिभाननम्।
चारुहासम् सुताम्रोष्टं रत्नोज्वलितकुण्डलम्॥
सुभ्रुललाटमकुटं घनकुञ्चितमूर्धजम्।
ललाटतिलकं सौम्यं दीपवत् श्वेतमृत्स्नया॥
स्फुरत्कटककेयुर हारकौस्तुभभूषितम्।
स्फुरत्भास्वरवर्णाभं शोभितं वनमलया॥
श्रीभूमिभ्याम् सुखासीनम् स्वर्ण सिह्मासनेशुभे।
ध्यात्वेवम् देवदेवेशम् मन्त्रजापपरो भवेत् ॥
शुक्लम् हिरण्मयम् कृष्णम् रक्तम् कुङ्कुम सन्निभम्।
पद्मकिञ्जल्क सदृशम् अष्टमम् सर्ववर्णवत्॥ एवंध्यात्वा॥

***************************

## श्री विष्णु षडक्षर न्यास विधिः

अस्य श्री विष्णु षडक्षर महा मन्त्रस्य । ब्रह्मा ऋषिः , देवि गायत्री छन्दः । श्रीमहाविष्णुः देवता, प्रणवं बीजम् । इम् शक्तिः,मम् कीलकम् । कुमुदादि वर्णः उदात्तादि स्वरः ,भगवत्समाराधनार्थे जपे विनियोगः। (श्री विष्णु सान्निध्यर्थे इति पा)

## करन्यास:

ओम् ओम् ओम्　　　अङ्गुष्ठाभ्याम् नम:
ओम् नम् ओम्　　　तर्जनीभ्याम् स्वाहा
ओम् मोम् ओम्　　　मध्यमाभ्यां वषट्।
ओम् विम् ओम्　　　अनामिकाभ्याम् हुम्
ओम् ष्णम् ओम्　　　कनिष्ठिकाभ्याम् फट्।
ओम् वेम् ओम्　　　नखमुखै वौषट्।

## अथ देह न्यास:

ओम् ओम् ओम्　　　ज्ञानाय हृदयाय नम:
ओम् नम् ओम्　　　ऐश्वर्याय शिरसे स्वाहा
ओम् मोम् ओम्　　　शक्त्यै शिखायै वषट्।
ओम् विम् ओम्　　　बलाय कवचाय हुम्।
ओम् ष्णम् ओम्　　　तेजसे नेत्राभ्याम् वौषट्।
ओम् वेम् ओम्　　　वीर्याय अस्त्राय फट्।

ओम् किरीट मुद्रायैनम:　　　शिरसि
ओम् श्रीवत्स मुद्रायैनम:　　　दक्षिणोरसि
ओम् कौस्तुभ मुद्रायै नम:　　　वामोरसि
ओम् वनमाल मुद्रायै नम:　　　कण्ठे
ओम् चक्र मुद्रायैनम:,ओम् पद्म मुद्रायै नम:　　　दक्षिण भागे।
ओम् शङ्ख मुद्रायै नम:,ओम् गदा मुद्रायै नम:　　　वाम भागे
ओम् अनन्त मुद्रायै नम:,गरुड मुद्रायै नमः विष्वक्सेन मुद्रायै नम:　　　पादाग्रे

## श्री विष्णु षडक्षर ध्यानम्

विष्णुम् सारथ चंद्रकोटिसदृशम् शङ्खम् रथाङ्गं गदा॥
अंबोजम् दधतम् सिताब्जनिलयम् कान्तम्जगन्मोहनम्।
आबद्धाङ्गत हार कुण्डलमहा शोभास्पुरद्वक्षसम्।
श्रीवत्साङ्गमुदार कौस्तुभधरम् वन्दे मुनीन्द्रावृतम्। इति ध्यात्वा

द्वादशाक्षर, अष्टाक्षर; विष्णु षडक्षरान् अक्ष मालया अष्टोत्तर शतं वा, अष्टा विंशति र्वा,अष्टौ वा (पू)बीजाद्यन्ते सम्पुटितम्जपेत्।

*****************************

## मानसाराधनम्

सौवर्णस्थालिवल्ये मणिगण खचिते गोघृताक्तान् सुपक्वान्।
भक्ष्यान् भोज्यांन्श्च लेह्यानपरिमितमहो शोष्यमन्नं निधाय।
नानाशाखैरुपेतं दधिमधुगुळक्षीर पानीय युक्तम्।
तांबूलं चापि विष्णोः प्रतिदिवसमहो मानसं कल्पयामि।

हृदब्जे मूलभेरात् भगवन्तम् वासुदेवं ध्यात्वा। ओं नमोभगवतेवासुदेवाय मन्त्रासनम् समर्पयामि। ओम् अर्घ्यं समर्पयामि, पाद्यम् समर्पयामि, आचमनीयम् समर्पयामि, दिव्यस्नानम् समर्पयामि । प्लोत वस्त्रम्, कस्तूरि तिलकम्, ब्रह्मसूत्रम् समर्पयामि । गन्ध, सर्वाभरण,पुष्पाक्षतान्, समर्पयामि । धूप,दीपम्, समर्पयामि । क्षीर गुळ पायसान्नम् निवेदयामि। पानक पानीय आचमनीयम् समर्पयामि । समस्त राजोपचार पूजान् समर्पयामि।

"भगवन् पुण्डरीकाक्ष शरणागत वत्सल।
गृहाण मानसीम् पूजां यथार्थ परिभाविताम्। "

इति तुळसीजलम् भूमौ निक्षिप्य।

***********************

अथ भाह्ययाग विधिः

ओम् घण्टाधिदैवताय ओम् कं ब्रह्मणे नमः। इति घण्टाम् संचाल्य। चालयित्वा। धूप पात्राधिदैवताय ओम् पावकाय नमः। दीप पात्राधि दैवताय ओम् भास्कराय नमः। वर्धन्यादिअर्चन पात्राधि दैवताय ओम् वम् वरुणाय नमः। इत्यभ्यर्च्य। विष्णु गायत्र्या सर्वाणिद्रव्याणि प्रक्षाळ्य। ''शुचीवो हव्या... इति मन्त्रम् पठित्वा।

ओम् त्रिपादुकाधिदैवताय ओम् त्रेथाग्नये नमः।

ओम् रम् बालाग्नये नमः, ओम् रम् यौवनाग्नये नमः,ओम् रम् वृद्धाग्नये नमः, पात्रादाराधि दैवताय ओम् लम् पृथ्व्यै नमः,तदुपरि आग्नेयादि कोणेषु अर्घ्य, पाद्य, आचमनीय, स्नानीय पात्राणि मध्ये शुद्धोदकपात्रान् संस्थाप्य । गाळितोदकैः आपूर्य । प्रणवेन स्पृष्ट्वा । ओम् अर्घ्यं परिकल्पयामि । ओम् पाद्यं परिकल्पयामि । ओम् आचमनीयम् परिकल्पयामि । ओम् स्नानीयम् परिकल्पयामि । ओम् शुद्धोदकम् परिकल्पयामि । इति तुळसीम् निक्षिप्य।

कुशाग्राक्षत, पुष्प, फल, चंदन ,तिल, सिद्धार्थ, यवान् अर्घ्यपात्रे।

तिलम्, दूर्वा, विष्णुपर्णी, श्यामाक, पद्म, अक्षतानि पाद्य पात्रे।

एला, लवङ्ग ', जाती, तक्कोल, चंदन, पुष्पाणि आचमनीयपात्रे।

गन्ध, सर्वौषधीः, रत्न, फल, बीज, कुश, तिल ,अक्षत,दधि, क्षीर, घृत, रजनी, द्वादश द्रव्याणि स्नानीयपात्रे।

कोष्टम्, माम्सी, हरिद्र, मुरा, शैलेय, चम्पक, वचा, कच्चोर, मुस्ता, सर्वौषधीः शुद्धोदकपात्रे निक्षिप्य।

दक्षिण हस्ते ओम् रम् द्वादशाराय चक्राय नमः, तन्मध्ये ओम् हम् सूर्याय नमः, दीप्तैः तद्रश्मिभिः द्रव्याणि दग्धानि ध्यात्वा।

वाम हस्ते ओम् षोडशदळयुताय विकस्वराय श्वेत पद्माय नमः,तन्मध्ये ओम् वम् षोडशकलायुताय अमृतमयाय चन्द्रमसे नमः, दीप्तैः तद्रश्मिभिः द्रव्याणि सिक्तानि

ध्यात्वा ।

तानि यागयोग्यानि विचिंत्य। हस्तयोरुभयो: देवम् नारायणम् ध्यात्वा । ताभ्यांद्रव्याणि सकृत्सकृत् संस्पृश्य। विष्णुगायत्र्या अभिमन्त्र्य ।
ओम् सुम् सुरभ्यै नम: इति सुरभि मुद्राम् प्रदर्श्य । तद्दुग्धैः अमृताम्बुभिः पूरितानि विचिंत्य । अर्घ्यपात्रात् किञ्चिज्जलम् अन्यस्मिन् पात्रे गृहीत्वा । आधार स्थालिकोपरि विन्यस्य ।

अर्घ्यपात्रे ओम् श्रियै नम:, पाद्य पात्रे ओम् पितृभ्यो नम:, आचमनीय पात्रे ओम् सरस्वत्यै नम:, स्नानीय पात्रे ओम् वरुणाय नम:, शुद्धोदकपात्रे ओं नमोभगवते वासुदेवाय शान्त्यै नम: इत्यावाह्य । धूप दीपम् समर्प्य । पात्रान्तरस्थमघ्यजलम् वाम हस्ते निधाय । दक्षिण हस्तेन पिधाय। ओंनमोनारायणायेति सप्तवारं अभिमन्त्र्य । तज्जलेन ओम् सहस्रार हुम् फट्; इति सर्वाणि द्रव्याणि आत्मानं च प्रोक्ष्य । मूलभेरस्य पादयो: तुळसीं समर्प्य । ओम् नमोभगवते वासुदेवाय सपर्यासनं समर्पयामि । इति प्राथ्र्य ।

*****************************

## योग पीठार्चन विधिः

**अर्चनं योग पीठस्य मन्त्रन्यसनमेवच।**
**बिम्बेस्थिरे सदाकार्यम् पूजारंभे चतुर्मुख।**

इति वचनात् मूलभेरस्य पादयो: योग पीठार्चनं कुर्यात्:

ओम् ह्रीं आधार शक्त्यै नम:
ओम् ओ्रम् ष्ट्रूं काल पावक कूर्माय नम:
ओम् हं सहस्र फणाधृत चतुरश्र भूमण्डलाय अनन्ताय नम:
ओम् भूम् भूम्यै नम: ।

तदुपरि आग्नेयादि कोणेषु

ओम् धर्माय नम: , ओम् ज्ञानाय नम: ,

ओम् वैराग्याय नमः ,     ओम् ऐश्वर्याय नमः ,

एतान् योगासनाङ्घ्रिरूपान् पुरुषाकृतीन् चतुर्भुज़ान् सिह्मवक्रान् स्थितान् ध्यायामि।

ओम् अधर्मायनमः ,     ओम् अज्ञानाय नमः ,

ओम् अवैराग्यायनमः , ओम् अनैश्वर्याय नमः ,

मध्ये ओम् सदाशिवाय नमः ।

एतान् अरुण वर्णान् अञ्जलि हस्तान् पूर्वोक्त रूपान् ध्यायामि ।

योगासनाङ्घ्रि अन्तरान्तर प्रागादिषु,

ओम् ऋग्वेदाय नमः ,     ओम् यजुर्वेदाय नमः ।

ओम् सामवेदाय नमः ,     ओम् अथर्ववेदाय नमः ।

ओम् कृतयुगाय नमः ,     ओं त्रेतायुगाय नमः ,

ओम् द्वापरयुगाय नमः,     ओम् कलियुगाय नमः ।

ओम् वैकारिक अहंकाराय नमः,

ओम् तैजसिक अहंकाराय नमः,

ओम् भौतिक अहंकाराय नमः,

एतान् पाशरूपयुतान् ध्यायामि ।

ओम् सत्वगुणाय नमः ,

ओम् रजोगुणाय नमः ,

ओम् तमोगुणाय नमः ।

एतान् गुणरूपेन ध्यायामि।

ओम् ङं घं गं खं कं तूलिकारूपेभ्यो पृथिव्यप्तेजोवाय्वाकाशात्मने नमः ।

ओम् मम् आस्तरण रूपाय जीवात्मने नमः ।

तदुपरि ओम् रम् अग्निमण्डलाय नमः ।

ओम् वम् सोममण्डलाय नमः ।

ओम् हम् सूर्यमण्डलाय नमः ।

उपरि ओम् श्वेताय द्वादशदळयुतायविपुल कर्णिका केसरयुताय गुणत्रयात्मकाय

अव्यक्तपद्माय नमः । ओम् भद्रासनाय नमः ।

इत्यासनान्तस्थ देवताश्च आवाह्य अभ्यर्च्य।

पीठस्य दक्षिणे पार्श्वे

ओम् ब्रह्मणे नमः ओम् विष्णवे नमः ओम् ईश्वराय नमः ।

उत्तरे ओम् सनत्कुमारायनमः ओम् सनकाय नमःओम् सनन्ताय नमः ।

पश्चिमे ओम् दुर्गायै नमः , ओम् विघ्नेशायनमः ,ओम् नारदाय नमः ।

अग्रे ओम् अस्मद्गुरुभ्यो नमः ,

ओं अस्मत्परमगुरुभ्यो नमः ,

ओम् अस्मत्सर्व गुरुभ्यो नमः ।

इत्यात्मानगुरुं च ध्यात्वा।

**सकल वेदान्त सारार्थ पूर्णाशयम्। विपुल वादूल गोत्रोद्भवानाम् वरम्।**
**रुचिर जामातृ योगीन्द्र पादाश्रयम् वरद नारायणम् मद्गुरुम् संश्रये।**

इत्यभ्यर्च्य । धूप दीपम् समर्प्य। आवाहन पात्रम् अद्भिरापूर्य । तुळसीम् निक्षिप्य । हृदयस्थम् देवम् ओम् नमोभगवतेवासुदेवाय श्री भूमि नीळासमेताय देवाधिराजस्वामिने नमः इति तुळसीम् मूलभेरस्यमूर्ध्नि समर्प्य। सुस्थितो अभिमुखोभव इति प्रार्थ्य। प्रतिमामुद्राम् प्रदश्र्य। नाभ्यादि हृदयान्तम् द्वादशाक्षरेण स्थितिन्यासम् कुर्यात्। किरीटादि मुद्रान् प्रदश्र्य॥

श्री देव्याः

शब्दब्रह्म स्वरूपिणीम् सर्व शक्ति मयीम्

ओम् श्रीम् श्रियै नमः पद्मासनं समर्पयामि।

| | |
|---|---|
| ओम् श्राम् ज्ञानाय | हृदयाय नमः , |
| ओम् श्रीम् ऐश्वर्याय | शिरसे स्वाहा , |
| ओम् श्रूम् शक्त्यै | शिखायै वषट् , |
| ओम् श्रैं बलाय | कवचाय हुम् , |
| ओम् श्रौम् तेजसे | नेत्राभ्याम् वौषट्; |

ओम् श्रः वीर्याय अस्त्रायफट् ।

इति षडङ्गं च कृत्वा। किरीट, कमल, वनमाल मुद्रां च प्रदर्श्य।

श्रीदेवि ध्यानम्

श्रियं च दक्षिणेपार्श्वे चिन्तयेत् पद्मसंभवाम्,
तप्त हाटकसङ्काशाम् पद्म पत्रायतेक्षणाम्,
तिसृभिः परिचूडाभिःललाटोपरि शोभिताम्,
सपद्म वामहस्तान्ताम् कक्ष्या बद्धगण स्तनीम्,
प्रसारितेतरकराम् सर्वाभरण भूषिताम् ।
प्रसन्न वदनाम् देवीम् भगवत् पाद वीक्षणाम् ॥
त्रिभङ्गीम् कोमळाम् कान्ताम् सुमुखीम् भावयेत् सदा।

इति ध्यात्वा धूप दीपम् समर्प्य ।

भू देव्याः

शब्द् ब्रह्मस्वरूपिणीम् सर्वशक्तिमयीम्

ओम् ह्रीम् भूम्यै नमः पद्मासनम् समर्पयामि ।

ओम् ह्राम् ज्ञानाय हृदयाय नमः,
ओम् ह्रीं ऐश्वर्यायशिरसे स्वाहा,
ओम् ह्रूम् शक्त्यै शिखायै वषट्; ओम् ह्रैम्
बलाय कवचाय हुम् , ओम् ह्रौम् तेजसे
नेत्राभ्याम् वौषट्; ओम् ह्रः वीर्याय अस्त्रायफट्।

इति षडङ्गं च कृत्वा। किरीट,कमल, वनमाल मुद्रां च प्रदर्श्य ।

भूदेवि ध्यानम्

वामपार्श्वे महींदेवीं द्विहस्तां श्यामळ प्रभाम्।
स्तनबन्ध विहीनाङ्गीं सर्वाभरण भूषिताम्।
त्रिभङ्गीम् कोमळां कान्ताम् लक्ष्मीवन्मकुटोज्वलाम्।
वहन्तीम् दक्षिणे हस्ते लसत्कल्हार कुङ्मलाम्।

प्रसारितेतरकराम् प्रसन्नेंदु निभानाम्।
भक्ताभीष्टप्रदाम् देवीम् सुमुखीं भावयेत्सदा।

श्री नीळा देव्याः न्यासमुच्यते

शब्दब्रह्मस्वरूपिणीं सर्वशक्ति मयीम् ओं णम् नीळादेव्यै नमः।
ओं णाम् इत्यादि षडङ्ग न्यासं कृत्वा। किरीटादि मुद्रां प्रदश्र्य।

ध्यानम्

श्रीमत्तुळसी रूपाम् विष्णुपत्नीं हरिप्रियाम्।
सर्वाभरण सम्युक्ताम् नीळादेवीमहं भजे।
भक्ताभीष्टप्रदाम् देवीम् सुमुखीं भावयेत्सदा।
इति ध्यात्वा। धूप दीपम् समर्प्य.

********************************

मन्त्रासन विधिः

ओम् अर्चत प्रार्चत नरः, प्रिय मेधासो अर्चत,
अर्चन्तु पुत्रका उता, पुरामि धृष्णा अर्चत इति सामपठन् ओम् नमो भगवते वासुदेवाय फलम् भवतु मे पुष्पैर्नमः स्वाहा, इति पुष्पाञ्जलिम् कुर्यात् ।

**विभो सकल लोकेश विष्णो जिष्णो प्रभोहर।**
**त्वाम् भक्त्यापूजयांयद्य भोगैरर्घ्योदिभिःक्रमात्।**
**दिव्येनाऽर्घ्योपचारेण यथा शक्ति यथा विधि।**
**अर्चयिष्यामि समये भगवन्तम् जनार्दनम्।**

ओम् नमो भगवते वासुदेवाय मन्त्रासनम् समर्पयामि।
इति सर्वत्र प्रार्थ्य।

ओम् तत्सवितुर्वरेण्यं भर्गो देवस्यधीमहि
धीयो योनः प्रचोदयात्

अर्घ्यम् समर्पयामि। इति देवस्य मूर्ध्नि अर्घ्य समर्प्र्य।

ओम् त्रीणि पदाविचक्रमे विष्णुर्गोपाऽथाभ्य:
ततोधर्माणिधारय़न्

पादयो: पाद्यं समर्पयामि। इति द्विवारं।

ओम् आप: पुनन्तु पृथ्वीं पृथिवी पूतापुनातुमां.
पुनन्तु ब्रह्मणस्पति: ब्रह्म पूतापुनातु माम्।

इति आचमनीयम् समर्पयामि।

**दासोहम् ते जगन्नाथ स पुत्रादि परिग्रह:**
**प्रेष्यम् प्रशाधिकर्तव्ये माम् नियुङ्क्ष्व हिते सदा।**

इति देवम् साष्टाङ्गम् प्रणम्य।

मधुक्षीरं च दध्याज्यम् मधु पर्कमिति स्मृतम्।
एकाङ्गं वा समस्तम् वा मधुपर्कम् न लोपयेत्।

इत्युक्तवत् ओम् नमोभगवतेवासुदेवाय मधुपर्कम् निवेदयामि।

ओम् मधु वाता ऋतायते, मधु क्षरन्ति सिंधव:,
माद्वीर्णस्सन्त्वौषधीः इति मन्त्रेण समर्प्य।

आचमनीयं समर्प्य। हस्त, मुख, पादशाटीम्

**विष्णोरराट**….. इतिमन्त्रेण समर्प्य।

योगासनाब्जपत्रेषु, पूर्वादिषु, द्वादश दळेषु।

**ओम् श्रीवत्साय नम: , ओम् वनमालायै नम: ,**
**ओम् योगमायायै नम: , ओं वैष्णव्यै नम: ,**
**ओम् विमलायै नम: । ओम् सृष्ट्यै नम: ,**
**ओम् उत्कर्षिण्यै नम: , ओम् प्रज्ञायै नम: ,**
**ओम् सत्यायै नम: , ओम् ऐशान्यै नम: ,**
**ओम् अनुकम्पायै नम: , ओम् पितामह्यै नम: ।**

एता: पुष्पाञ्जलिधरम् ध्यात्वा।

<u>प्रथमावरणे सूर्य मण्डलस्योपरि</u>

**ओम् व्याप्त्यै नमः ,** **ओम् कांत्यै नमः ,**
**ओम् तृप्त्यै नमः ,** **ओम् श्रद्धायै नमः ,**
**ओम् विद्यायै नमः ,** **ओम् जयायै नमः ,**
**ओम् क्षमायै नमः ,** **ओम् शांत्यै नमः ,**

एताः चामर धारिणीम् ध्यात्वा ।

द्वितीया वरणे सोममण्डलस्योपरि

**ओम् शङ्खिणे नमः ,** **ओम् चक्रिणे नमः ,**
**ओम् गदिने नमः ,** **ओम् खड्गिणे नमः ,**
**ओम् पद्मिने नमः ,** **ओम् मुसलिने नमः ,**
**ओम् शार्ङ्गिणे नमः ,** **ओम् वनमालिने नमः ।**

एताः आयुध धारिणीम् ध्यात्वा ।

त्रितीयावरणे अग्नि मण्डलस्योपरि

**ओम् इन्द्राय नमः ,** **ओम् अग्नये नमः ,**
**ओम् यमाय नमः ,** **ओम् नैऋतये नमः ,**
**ओं वरुणाय नमः ,** **ओम् वायवे नमः ,**
**ओम् सोमाय नमः ,** **ओम् ईशानाय नमः ।**

त्रितीयावरणाद्बहिः भगवतः प्रति मुखे ओम् क्षम् वैनतेयाय नमः ।

ऐशान्याम् ओम् विष्वक्सेनाय नमः ,पादुके ओं अनन्ताय नमः । इत्यभ्यर्च्य। धूप, दीपम् समर्प्य.

************************************

<u>कर्मार्चादि बिम्बानाम् पूजन विधिः उच्यते</u>

**कर्मार्चा च, उत्सवार्चा, बल्यर्चाच ,तथापरे ।**
**स्नान, तीर्थोभयार्चा च ,शयनार्चेति षड्विधाः।**

इत्युक्तवत् षङ्बेर पूजा विषये सर्वत्र योगपीठार्चनम् पूर्ववत् कृत्वा । अनन्तरम् वक्ष्यमाणेनविधिना आवाहन पात्रम् अद्भिरापूर्य तुळसीम् निक्षिप्य । मूल भेरात् यच्चक्तिम् ओम्नमोनारायणाय आगच्छ आगच्छ इति वारचतुष्टयम् उक्त्वा । कर्मभेरस्य मूर्ध्नि तत्तोयं तुळस्या समर्प्य ।

प्रतिमा मुद्रां प्रदर्श्य । आवाहितो भव, स्थापितो भव, सन्निधानो भव, सन्निरुद्धो भव, साम्मुख्यो भव, प्रार्थितो भव॥

**स्वामिन् सर्व जगन्नाथ यावत् पूजावसानकम् ।**
**तावत् त्वम् भक्तिभावेन बिम्बेस्मिन् सन्निधिम् कुरु ।**

इति यागावसानिकम् प्रार्थ्य ॥ नाभ्यादि हृदयान्तम् अष्टाक्षरेण स्थितिन्यासम्कृत्वा । किरीटादि मुद्रान् प्रदर्श्य ॥ एवम् षङ्बेर विधाने कर्मार्चा, उत्सवार्चा, बल्यर्चा, स्नानार्चा, तीर्थार्चा पर्यन्तम् आवाहनादि मुद्राप्रदर्शन पूर्वकम् अष्टाक्षरेणैव स्थितिन्यासं कारयेत् । शयनभेर मात्रमेव ओम् नमो विष्णवे आगच्छ इत्यावाह्य । आवाहनादि मुद्रापूर्वकम्। विष्णुषडक्षरेण स्थिति न्यासम् कृत्वा । किरीटादिमुद्राम् प्रदर्श्य ॥ पूर्ववत् श्री भू देव्योरपि आवाहनम् कृत्वा ।

**अरविंदासनेदेवि पद्मगर्भे समुद्भवे ।**
**आगच्छाऽऽवाहने पात्रे गोविन्द गृह मेधिनी ।**

इति श्री देव्या: मूलभेरात् आवाह्या । आवाहनादि षण्मुद्राम् प्रदर्श्य॥ ओम् श्रामित्याति षडङ्गं च कृत्वा । किरीट, कमल,वनमाल मुद्रांश्च प्रदर्श्य॥ भूदेव्या: ओम्

ह्रीं भूम्यै नम: आगच्छेति आवाह्य ।

प्रतिमा मुद्राम् प्रदश्‍र्य॥ आवाहनादि षण्मुद्राम् प्रदश्‍र्य॥

ओम् ह्राम् इत्यादि षडङ्गं च कृत्वा । किरीटादिमुद्राम् प्रदश्‍र्य॥

(श्री, भूदेव्या: विषये- मूल भेरम् न चेत् भगवत: श्रीवत्सात् आवाह्य । )

ओम् क्लीम् कृष्णाय गोविन्दाय गोपी जनवल्लभाय नम: इति सन्तान कृष्ण स्वामिनम् आवाह्य। पूर्ववत् मुद्रा दर्शन ओम् क्राम् इत्यादि षडङ्गन्यास पूर्वकम्, किरीटादि मुद्रां च कृत्वा । ओम् नमोभगवते महा सुदर्शनाय आगच्छ इति सुदर्शनम् आवाह्य । पूर्ववत् मुद्रा प्रदर्शन

| | |
|---|---|
| **ओम् आचक्रायस्वाहा** | **ज्ञानाय हृदयाय नमः।** |
| **ओम् विचक्रायस्वाहा** | **ऐश्वर्याय शिरसेस्वाहा।** |
| **ओम् सुचक्रायस्वाहा** | **शक्त्यै शिखायै वषट्।** |
| **ओम् धिचक्रायस्वाहा** | **बलायकवचाय हुं।** |
| **ओम् ज्वाला चक्राय स्वाहा** | **तेजसे नेत्राभ्यां वौषट्।** |

ओं महासुदर्शन चक्राय स्वाहा वीर्याय अस्त्राय फट्

इति षडङ्गं च कृत्वा । किरीटादि मुद्राणि प्रदश्‍र्य।

सर्वेषाम् मूलभेर पूजनवत् पुष्पाञ्जलि पूर्वक, मन्त्रासन प्रार्थन, अर्घ्य पाद्यादि उपचार, धूप,दीपान्तम् सम्पूज्य । इतिमन्त्रासनम् । स्नानसन उपचाऱान् प्रारभेत्

************************

स्नानस्नन विधिः

**स्नान कालस्त्वयम् प्राप्तः तवेच्छा वर्तते यदि।**

**अभ्यञ्जयित्वा देवेश सुस्नानम् कर्तुमर्हसि ।**

**स पादपीठमपरम् शुभंस्नानासनम् महत् ।**

**आसादयाशुस्नानार्थं मद्नुग्रह कांयया।**

इति देवेशम् प्रार्थ्य॥

ओम् पादुकाधि दैवताय ओम् अम् अनन्ताय नमः इति पादुकारोहणम् स्मृत्वा। अभिषेचनम्।

**उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे; उपप्रयन्तु**

**मरुतस्सु दानवः इन्द्र प्राशुर्भवासच, प्रैतुब्रह्मणस्पतिः**

इति देवम् उत्थितम् स्मृत्वा ।

**भद्रम् कर्णेभिःश्रुणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।**

**स्थिरैरङ्गैस्तुष्टु वागुंसस्तनूपिः व्यशेम देवहितम् यदायुः ।**

इति स्नानासन वेदिकायाम् निविष्टम् विचिन्त्य।

ओम् तद्विष्णोः परमम् पदँसदापश्यन्ति सूरयः, दिवीवचक्षुराततम् ।

तद्विप्रासो विपन्यवो जाग्रु वाम् सस्समिन्धते । विष्णोर्यत् परमम् पदम् ।

ओं नमो नारायणाय दन्तधावनम् समर्पयामि ।

**ओम् नारायणाय विद्महे वासु देवाय धीमहि**

**तन्नो विष्णुः प्रचोदयात्।**

इति जिह्वा निर्लेपनम् समर्पयामि ।

ओम् हस्त प्रक्षाळणम् समर्पयामि।

**शन्नो देवीरभिष्टय आपो भवन्तु पीतये शम्यो रभिस्त्रवन्तुनः** इति गण्डूषं समर्पयामि ।

ओं पिशङ्गपृष्टिममृणं पिशाचमिन्द्र

संवृणा सर्वम् रक्षो निबर्हय। इति मुख मञ्जनम् समर्पयामि ।

हस्त प्रक्षाळणम् समर्पयामि। **विष्णोरराटमसि...विष्ण वेत्व।**

इति हस्त: मुख पादशाठीम् समर्पयामि ।

**ओम् वाम देवाय नमो ज्येष्टायनमो रुद्राय नम: कालाय नम: कलवि करणायनमो बलवि करणायनमो बल प्रमथनायनमो सर्वभूत तमनाय नमो मनोन्मनाय नम:।** इति अभ्यञ्जनं समर्पयामि ।

**ओं विष्णोर्णुकम् वीर्याणि** इति आमलक स्नानम् समर्पयामि ।

**नते विष्णुर्जाय मानो नजातो देव महिम्न: , परमंत आप उदस्तभ्ना नाकमृष्टम् बृहन्तं, दातर्थ पृथिवी मभितो मयूखै:।** '' इति अभिषेचनम् समर्पयामि ।

**आपोहिष्टामयोभुव:........आपोजनयताचन:।** इति स्नानंसमर्प्य।

**ओम् अतोदेवा अवन्तुनो ....... पृथिव्यासप्त दामभि:**

इति कनक कङ्कतेन केशशोधनम् समर्पयामि ।

कलश स्नपनम्। स्नानीयतीर्थेन वा सम्स्नाप्य।

(ओं आप्यायस्व इति क्षीरम्-दधिक्राविण्णो इति दधि-मधुवाता इति मधुना-ओं नारायणायविद्महे इति नाळिकेर जलेन)

**ओम् हिरण्य वर्णाम् .............जात वेदोम आवह**

इति हरिद्राभिषेचनम् समर्प्य।

**ओम् हिरण्य वर्णाःशुचय: पावका यासुजात: कश्यपोयास्विन्द्रः।**

**अग्निंया गर्भन्दधिरे विरूपास्तान आप:शग्गुस्योनाभवन्तु ।**

**यासागुम् राजा वरुणोयातिमध्ये सत्यानृतेऽवपश्यञ्जनानाम् ॥**

**मधुश्चुतश्शुचयोया: पावका: स्तान आप:शग्गुस्योनाभवन्तु॥**

**यासाम् देवा दिविकृण्वन्ति पक्षम् या अन्तरिक्षे**

**बहुधाभवन्ति। या:पृथ्वीगुम् पयसोन्दन्तुशुक्रास्तान**

**आप:शग्गुस्योनाभवन्तु॥ शिवेनमा चक्षुषापश्शिवया तनुवोपस्पृशन्तु त्वचम्मे । सर्वागुम् अग्नीगुंरप्सुषेमो मयि वर्चो बलमोजोनिधत्ता।**

इति गन्धाभिषेचनम् समर्प्य।

विष्णु गायत्र्या कुङ्कुमाभिषेचनम् समर्प्य ।

**पोतासपुना तुमा पुनन्तु मा देव जनाः पुनन्तु मनवोधिया।**

इति महा भिषेचनम् समर्पयामि ।

**ओम् तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि**

**धीयोयोनः प्रचोदयात्।** ʻʻ इति देवम् परिषिच्य।

**त्वं मेऽहं मे कुतस्तत्तदपि कुत इदं वेदमूलप्रमाणात्।**

**एतस्सानादिसिद्धादनुभव विभवाः सोबि सा क्रोशयेव।**

**क्वाः क्रोशः कस्यगीतादिषु ममविधितः कोत्रसाक्षी सुधीः स्यात्।**

**हन्त त्वःपक्षपाती सयितु नृकुल हे! मृग्य मध्यस्तव त्वम्।**

**देवदेवसुरास्सिद्धाः तीर्थानि च महर्षयः।**

**त्वत्सेवार्थं स्थितास्सर्वे स्नानेनैतान् कृतार्थयः।**

**सर्वमङ्गळसंयुक्ताः वेद वाद्याधि घोषणैः।**

**सहस्र धारया स्नानं कर्तुं देवः प्रसीद ओम्।**

**ओं शङ्खधाराधि दैवताय ओं जलेशाय नमः**

**ओं पद्म धाराधि दैवताय ओं पुष्टै नमः**

**ओं सहस्र धाराधि दैवताय ओं पूर्णचन्द्राय नमः**

इत्यभ्यर्च्य। पुरुष सूक्तेन संस्नाप्य।

**अग्निर्मूर्धा दिवःककुत्पतिः पृथिव्या अयं।**

**अपागुं रेतागुम्सिजिन्वति।**

इति प्लोतवस्त्रेण अङ्गांबुमार्जनं समर्प्य ।

**विष्णुगायत्र्या** दौत निर्मल वस्त्र द्वयं समर्पयामि ।

ओम् इति यज्ञोपवीतम् समर्प्य । ओम् उत्तरीयं समर्पयामि ।

ओम् नमो नारायणाय अर्घ्य पाद्य आचमनीयादीन् समर्पयामि ।

इति स्नानासनम्।

*************************

अलंकारासनम्

**सम्पन्नम् देवसद्वस्त्र भूषास्त्रक्कन्दनादिकम्।**

**अलंकारासनम् भद्रम् अधितिष्ठ त्रितीयकम्।**

ओम् नमोभगवतेवासुदेवाय अलंकारासनम्। समर्पयामि।

इति सर्वत्र प्रार्थ्य। अर्घ्यपाद्यादि उपचारान् समर्प्य॥

ओं मूर्धानम् दिवो अरतिम् पृथिव्यावैश्वानरमृताय जातमग्निम्, कविगुंसम्राजमतिथिम्जनाना मासन्ना पात्रं जनयन्तदेवा:। इति आर्द्रान् केशान् अगरुधूपेन शोषयामि ।

**विष्णु गायत्र्या** तिलक धारणम् समर्पयामि ।

**इदं विष्णु:** इति मन्त्रेण दिव्य गन्धं समर्प्य ।

**जितन्ते दक्षिणतो वृषभयेति हव्य: इन्द्रो जयाति नवराजयात ।**

**अधि राजो राजसु राजयाति।**

इति मन्त्रेण सर्वाभरणान् समर्पयामि ।

"**ओम् तद्विष्णो:**" इति मन्त्रेण दिव्य परिमळ पुष्पाणि समर्पयामि ।

**ओं इरावती धेनुमतीहि भूतम् सूयवसिनीमनवेदशस्ये व्यष्टब्णाद्रोतसी विष्णवेते दातर्थ पृथ्वीमभितो मयूखैः ।**

इति देवस्य पादयो: अक्षतान्समर्पयामि ।

विष्णु गायत्र्या अञ्जनम् समर्प्य।

दर्पणाधि दैवताय ओं श्री महालक्ष्म्यै नम: इत्यावाह्य । व्याहृत्या दर्पणं समर्प्य।

**ओम् धूरसि धूर्व धूर्वन्तं धूर्वतं तंधूर्वयम्**

**वयंधूर्वामह** - इति धूपमुद्रांप्रदर्श्य । धूपंसमर्प्य।

नक्षत्र दीपाधि दैवताय तारावृत चन्द्रमसे नम:

**ओम् उद्दीप्यस्वजातवेतोह्यपघ्नन्निरुऋर्तिं मम, पशूगुंश्चमह्यमावह जीवनं च दिशोदश।** इति दीपमुद्रां प्रदर्श्य। दीपारोपणम् कृत्व।

घट दीपाधि दैवताय ओम् लक्ष्म्यै नम: इति घटदीपमुद्रया सह घटदीपं समर्प्य ।

नीराजनं च समर्प्य। मन्त्र पुष्पं पठित्वा

## लघु मन्त्रपुष्पम्

हरिः ओम् अग्निमीळे पुरोहितं यज्ञस्यदेवं ऋत्विजम् । होतारं रत्नदातमम्।

हरिः ओं

हरिः ओं

इषेत्वोर्जेत्वा वायवस्तोपायवस्तः देवोवः सविताः प्रार्पयतुः श्रेष्ठतमाय कर्मणे।

हरिः ओम्

हरिःओम्। अग्न आयाहि वीतये घृणानो हव्यदातये। निहोतासत्सि बर्हिषि।

हरिः ओं

हरिःओम्।

शन्नोदेवीरभिष्टय आपोभवन्तु पीतये। शंयोरभिस्त्र वन्तु नः।

हरिः ओम्।

ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्ठात्।ओमित्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणस्याष्टाक्षरं पदम् । यो हवै नारायणस्याष्टाक्षरं पदमध्यम इति । अनुपब्रुमः सर्वमायुर इति । विंदते प्राजापत्यं रायस्पोषं गौपथ्यम् । ततोमृतत्वमश्नुते-ततोऽमृतत्वमश्नुत इति । य एवं वेद । इत्युपनिषत्.

अथ कर्माण्याचाराद्यानि गृह्यन्ते। उदगयन पूर्व पक्षाहः। पुण्याह एषु कार्याणि। यज्ञोपवीतिना प्रदक्षिणम्।

इच्छामोहि महाबाहुं रघुवीरं महाबलम्।
गजेन महतायान्तं रामं छत्रावृताननम्।

तं दृष्ट्वा शत्रु हन्तारं महर्षीणां सुखावहम्।
बबूवहृष्टा वैदेही भर्तारं परिषस्वजे।

तासामाविरभूच्छौरिः स्मयमान मुखांबुजः।

पीतांबरधरः स्रग्वी साक्षान्मन्मथ मन्मथः।

एष नारायणः श्रीमान् क्षीरार्णव निकेतनः।
नागपर्यङ्कमुत्सृज्य ष्वागतो मथुरा पुरीम्।

वैकुण्ठे तु परे लोके श्रियासार्द्धं जगत्पतिः।
आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैः सह।

¦ º ý È¡ ø குடையாம் இருந்தால் ஸிம்மாஸநமாம்*
நிý ருல் மரவடியாம் நீள்கடலுள் * ±ý றும் புணையாம்
அணிவிளக்காம் பூம்பட்டாம் புல்குமணையாம் திருமாற்கரவு|

कदा पुनः शङ्खरथाङ्ग कल्पक ध्वजारविन्दाङ्कुश वज्र लांछनम्।
त्रिविक्रम त्वच्चरणांबुज द्वयं मदीयमूर्द्धानमलङ्करिष्यति।

अखिलभुवनजन्म स्तेमभङ्गादि लीले।
विनत विविधभूतव्रात रक्षैक दीक्षे।
श्रुति शिरसिविदीप्ते ब्रह्मणि श्रीनिवासे।
भवतु मम परस्मिन् शेमुषी भक्तिरूपा।

श्रीमाधवाङ्घ्रि जलजद्वय नित्य सेवा।
प्रेमाविलाशय परांकुश पादभक्तम्।
कामादि दोषहरमात्म पदाश्रितानां ।
रामानुजं यतिपतिं प्रणमामि मूर्ध्ना।

<u>मात्रादानम्</u>

तिलान् वस्त्रम् तथा हैमम् तांबूलम् तण्डुलानपि ।
फलानि गव्यमाघारम् गाश्च धान्यम् यथा वसु ।
गोग्रासम् देशिकायैव दद्याद्देवस्यसन्निधौ।

इतिवत् मात्रादानम् कृत्व। ओम् इति गृहीत्वा । इति अलंकारासनम्॥

**********************

अथ भोज्यासन विधिः

प्रभूत मेध्यानि अन्नानि भक्ष्य भोज्याण्यनेकशः,
सम्पन्नानि जगन्नाथ भोज्यासनमुपाश्रय।

ओं नमो भगवतेवासुदेवाय भोज्यासनं समर्पयामि । इति सर्वत्र प्रार्थ्य॥ पुनः मन्त्रासनार्थं अर्घ्यपाद्य आचमनीय मधुपर्कादीन् समर्प्य । स्थलानि संशोध्य॥ सर्वविध भक्ष्य, भोज्यानि देवस्य पुरतः विनिवेश्य । शुद्धोदक जलेन ओम् अस्त्रायफट् इति प्रोक्ष्य॥

ओम् यं नमः शोषयामि ओम् रं नमः दाहयामि
ओम् वं नमः प्लावयामि इति शोषणादीनि कृत्वा।

ओम् बलाय कवचाय हुम् इति परिषिच्य ।

ओम् सुम् सुरभ्यै नमः इति सुरभि मुद्रां प्रदर्श्य॥ तुळसीम् निक्षिप्य।

**शीतळोदक सम्पूर्णम् एला कर्पूर सम्युतम्,**
**मंदोष्णम् वासनायुक्तम् अर्हणांबु इति स्मृतम्।**

इत्युक्तवत् ओम् इति अर्हण पानीयं समर्प्य।

अन्वारब्धस्सव्येन दक्षिण करेण दर्शित ग्रास मुद्रया

**ओम् देवस्यत्वा सवितु प्रसवे ।**
**अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णातु ॥**

ओम् नमो भगवतेवासुदेवाय क्षीरगुळ पायसान्नं स्वाहा ।

इति सप्तवारं उक्त्वा निवेद्य॥ सर्वत्र च विनिवेद्य। पूर्ववत् आचमनीयम् समर्प्य, हस्त मुख पाद शाठीं समर्प्य। तांबूलादीनि निवेद्य॥ इति भोज्यासनम् ।

पाक शालायां नित्याग्नि कुण्डे नित्यहोमं कृत्वा ।

************************

## नित्यहोम विधिः

यागबेर शक्ति पात्रे आवाह्य।वस्त्रेण आच्छाद्य। सकलवाद्य पुरस्सरम् पाकशाला कुण्डसमीपं गत्वा। कूर्मासने उपविश्य।प्राणानायम्य।

अस्यदेवदेवस्य.... स्वामिनः नित्याराधन कर्मणि नित्यहोमं करिष्ये।

इति संकल्प्य। ओं रं अग्नये नमः। अभिमुखो भव।

**चतुर्भुजं त्रिनेत्रं च एकवक्रं जटाधरम्।**
**शूलं परसु हस्तं च अभयं वरदान्वितम्।**
**सप्तजिह्वान्वितं शक्ति उपवीतोत्तरीयकम्।**
**मेषासीनं सितं नित्ये शिवं वृद्धाग्निमारभेत्।**

इति वृद्धाग्निं ध्यात्वा।आज्यसंस्कार पूर्वकं प्रजापतिं मनसा ध्यायन्।

अदितेनुमन्यस्व इत्यादिना परिषिच्य।समिद्भिः मूलमन्त्रेण जुहुयात्। आधारादि पद्मान्तं हुत्वा।पात्रस्थं देवं अग्नौ समावाह्य।न्यासादीन् कृत्वा अर्घ्यादि नैवेद्यान्तं हुत्वा।समिधः मूलमन्त्रेण षोडशाहुतिर्हुत्वा।

पंचोपनिषण्मन्त्रेण शान्तिहोमं कृत्वा। मूर्तिमन्त्रेण पूर्णाहितीम्, मूलमन्त्रेण पूर्णाहितिं हुत्वा. अदितेन्वमग्ंस्थाः इत्यादिना परिषिच्य।अग्निस्थं देवं पूर्ववत् पात्रे आवाह्य।गर्भगृहं प्रविश्य।पात्रस्थं देवं मूलबेरे नियोज्य।

बलिबेर शक्तिम् पात्रे आवाह्य। बलिम् दत्वा।

*************************

## द्वार बलि विधिः उच्यते

### १ गर्भ गृहद्वारे

ओम् वास्तु पुरुषाय नम:          ओम् क्षेत्र पालाय नम:

ओं द्वार श्रियै नम:          ओम् द्वार भूम्यै नम:

सोदकं बलिम् ददामि इति तुळसीजलेनसह प्रसादं समर्प्य ।

### २ अर्धमण्डप द्वारे

ओम् द्रां चण्डाय नम:          ओम् द्रों प्रचण्डायनम:

मध्ये ओम् क्षम् गरुडाय नम: सोदकं बलिम् ददामि

### ३ महा मण्डप द्वारे

ओम् धात्रे नम:          ओं विधात्रे नम:

सोदकं बलिम् ददामि।

### ४ नृत्त मण्डप द्वारे

ओम् भद्राय नमः          ओं सुभद्राय नमः

सोदकं बलिम् ददामि ।

### ५ वाद्य मण्डप द्वारे

ओम् जयाय नम:          ओं विजयाय नम:

सोदकं बलिम् ददामि ।

### प्रथमावरणे

ओम् इन्द्राय नम: ,          ओम् अग्नये नम: ,

ओम् यमाय नम:,          ओम् नैऋतये नम: ,

ओं वरुणाय नम:,          ओम् वायवे नम:,

ओम् कुबेराय नम:,          ओं ईशानाय नम:

सोदकं बलिम् ददामि ।

द्वितीयावरणे

ओम् कुमुदाय नमः, ओं कुमुदाक्षाय नमः,
ओं पुण्डरीकायनमः, ओं वामनाय नमः,
ओं शङ्कुकर्णाय नमः, ओम् सर्वनेत्राय नमः,
ओं सुमुखाय नमः , ओं सुप्रतिष्ठाय नमः
सोदकं बलिम् ददामि।

महाबलिपीठे सर्वेभ्यो विष्णु पार्षदेभ्यो नमः सोदकं बलिम् ददामि।

<u>महाबलि पीठ ध्यानम्</u>

मुख पञ्च सम वक्र सम नासि नयने
दश कर्ण दशबाहु दश चक्र दश सृक्,
अति रक्त तनु वर्ण गळमेक हृदयम्
द्वय पाद हित भूत बलिपीठ देवम्।

इति ध्यात्वा । इति अन्नम्पूर्णेनसमर्प्य । गर्भगृहम् गत्वा । मूल भेरस्य पादयोः तुलसी पुष्पाणि च समर्प्य । यथा शक्ति मूलमन्त्रं जप्त्वा ।

**पुण्डरीकाक्ष विश्वात्मन् मन्त्रमूर्ते जनार्दन!।**
**गृहाणमत्कृतां पूजां जपान्तां भक्तवत्सल।**

इति तुळसीजलं भूमौ निक्षिप्य।

**अपराध शतम्चैव सहस्रमयुतम् तथा ।**
**अर्भुतम् चाप्यसङ्ख्येयम् करुणाब्धे क्षमस्व मे ।**

इति भगवन्तम् प्रार्थ्य। वेदादीन् समापनं कुर्यात्। भगवत् तीर्थानि प्रथमं आचार्यः स्वयमेव गृहीत्वा। अन्येभ्यो दद्यात्।

***********************

शयनासन विधिः

**भगव़न् पुण्डरीकाक्ष कृपाळो पुरुषोत्तम,**

**आसादय मया दत्तम् पर्यङ्कासनमुत्तमम्।** इति भगवन्तं प्रार्थ्य।

ओम् नमोभगवते वासुदेवाय शयनासनं समर्पयामि । ओंनमोनारायणाय शयनासनम् समर्पयामि । ओं नमोविष्णवे शयनासनम् समर्पयामि।

इति प्रार्थ्य। सर्वत्र अर्घ्य,पाद्य, आचमनीयादीन् समर्प्य। शाल्यान्न शुष्क क्षीरम् निवेद्य। क्षौमवस्त्र, कार्पास उपदानानि पर्यङ्के निदाय । तेषु अनन्तं आवाह्य । शयनभेरम् शाययित्वा । वीणा वेणु वाद्यानि वादयित्वा । शनै: शनै: कवाट बन्धनं कुर्यात्॥ द्वारे सुदर्शनम् ध्यात्वा । प्रादक्षिण्येन स्व गृहम् प्रविश्य॥ इति शयनासन विधिः।

<u>अपराध क्षमापण श्लोकाः (श्रीप्रश्नं)</u>

पुण्डरीकाक्ष विश्वात्मन् मन्त्र मूर्ते जनार्दन।
गृहाण मत्कृतां पूजां जपान्तां भक्तवत्सल।
नमस्ते निस्तरङ्गाय नमस्ते सर्वसाक्षिणे।
नमस्ते वासुदेवाय नमस्ते परमात्मने।
दुर्मानिनममर्यादं कृतघ्नं पापकारिणम्।
अशुचिं निर्दयं क्रूरं शठं चलितमानसम्।
अविनीतिनिधिं नात्मवेदिनं लोभ मन्दिरम्।
पराऽवमानिनं दम्भं अभक्तं दुर्जनाग्रगम्।
परनिंदापरंक्षुद्रं आत्मश्लाघा परंसदा।
पिशुनं काम वशगं असूया गर्भमन्दिरम्।
नृशंसं वञ्चकं दुष्टं अपराध सरित्पतिम्।
भव दुग्धाब्दि कल्लोलजालमग्नस्थमप्लवम्।
हतं दीनमनाथं हे शरण्य शरणार्थिनाम्।
त्वत्पाद पद्मपोतेन मामुद्धर्तुं त्वमर्हसि।

मय्यनाथे दयासिन्धो बन्धो सर्व जगद्धित।
प्रसीद कमलाकान्त वात्सल्य जलधिःकिल।
मयार्पित प्रणामांस्त्वां गृहाण पुरुषोत्तम।
भूमौ स्खलित पादानां भूमिरेवावलम्बनम्।
त्वयि विप्रतिपन्नानां त्वमेव शरणं विभो।
इति नित्याराधनविधिः संग्रहम् सम्पूर्णम्

*************************

श्रीः

श्रीमते रामानुजाय नमः

# श्रीवासुदेव पुण्याहवाचन विधिः

## सङ्कल्पम्

हरिः ओम्

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोप शान्तये ।
यस्यद्विरद वक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नम् निघ्नन्ति सततम् विष्वक्सेनम् तमाश्रये ।।

हरि ओम् तत् श्री गोविन्द गोविन्द गोविन्द अस्य श्री भगवतो महा पुरुषस्य विष्णोराज्ञयया प्रवर्तमानस्य- आद्यब्रह्मणः द्वितीय परार्धे श्री श्वेतवराह कल्पे। वैवस्वत मन्वन्तरे।

अष्टाविम्शति तमे कलियुगे प्रथमे पादे जम्भू द्वीपे भारतवर्षे भरतः कण्डे शखाब्दे मेरोःदक्षिणे पार्श्वे अस्मिन्वर्तमाने,व्यवहारिके प्रभवादि षष्टि सम्वत्सराणां मध्ये ___ संवत्सरे ______ अयने _____ ऋतौ ____ मासे _____ पक्षे ____ तिथौ ____ वासरयुक्तायाम् ______ नक्षत्रयुक्तायाम् शुभयोग शुभकरण सकल विशेषेण विशिष्टायाम् अस्याम् शुभतिथौ अस्य देव देवस्य भगवतो वासुदेवस्य श्री भूमिनीळा रङ्गयिकासमेतश्रीरङ्गानाथ स्वामि सन्निधौ नित्याराधनाङ्गं सर्वोपकरण शुध्यर्थम् वासुदेवपुण्याहवाचनम् करिष्ये।

## कलश स्थापन विधिः

१-चरणम्पवित्रमुच्चार्य महीम् प्रक्षाळ्य।

ओं चरणंपवित्रं विततं पुराणं। येनपूतस्थरति दुष्कृतानि॥
तेनपवित्रेण शुद्धेन पूताः। अति पाप्मानमरातिन्तरेम ॥

२-विष्णोरराट इति मन्त्रेण दर्भैः सम्मार्ज्य।

विष्णोरराटमसि विष्णोः पृष्ठमसिविष्णोःश्नप्त्रेस्तो विष्णोः स्यूरसि विष्णोः

ध्रुवमसि वैष्णवमसि विष्णवेत्वा।

३-गन्धद्वारेति मन्त्रेण गोमयेनानुलिप्य।

ओं गन्धद्वारां दुरादर्षां नित्यपुष्टांकरीषिणीं ।

ईश्वरीगुं सर्वभूतानां ता मिहो पह्व ये श्रियं॥

४-आप उन्दन्तु इति मन्त्रेण सुधाचूर्णैः अलंकृत्य।

आप उन्दन्तु जीवसे दीर्घायत्वाय वर्चसे यस्त्वा ।

हृदा कीरिणा मन्यमानो मत्र्यं मत्र्यो जोहवीमि॥

५-देवस्यत्वेति मन्त्रेण अक्षतान् विकीर्य।

देवस्यत्वा सवितप्रसवे अश्विणोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामि।

६-ग्रीष्मो हेमन्त इति मन्त्रेण धान्यपीठम् प्रकल्प्य।

ग्रीष्मो हेमन्त उदनोवसन्त शरद्वर्षास्सुवितन्नो अस्तु । तेषां ऋतूनागुं

शदशारदानां निवाद् एषांमभयेस्यामः।

७-शन्नोदेवीति मन्त्रेण शतपत्रम् विलिख्य।

शन्नोदेवीरभिष्टय आपोभवन्तु पीतये शँयोरभिस्त्रवन्तुनः

८-धन्वनागेति मन्त्रेण दर्भैः ऊर्ध्वमलंकृत्य।

धन्वनागा धन्वनाजिंजयेम धन्वना तीव्रा समदोजयेम।

धनुश्शत्रूरपगामं कृणोतु धन्वनासर्वागुंप्रतिशो जयेम॥

९-मूर्धानमिति मन्त्रेण शिरसा प्रणम्य।

मूर्धानन्दिवोऽरतिं पृथिव्या वैश्वानर मृतआजातमग्निं।

कविगुंसम्राजमतिथिञ्जनाना मासन्ना पात्रञ्जनयन्तदेवाः।

१०-भद्रं कर्णेति मन्त्रेण कलशान् संस्थाप्य।

भद्रं कर्णेभिःश्रुणुयाम देवाः। भद्रंपश्येमाक्षभिर्यजत्राः।

स्थिरैरङ्गै स्तुष्टुवागुंसस्तनूभि व्यशेम देवहितं यदायुः।

११-हिरण्यश्रृङ्गमितिमन्त्रेण गन्धजलेन सम्पूर्य।

हिरण्यश्रृङ्गं वरुणं प्रपध्ये तीर्थंमेदेहियाचितः ।

यन्मयाभुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ॥

(शोषणादीनि कृत्वा)

१२-विष्णुगायत्र्या आम्रपल्लवम् निक्षिप्य।

नारायणाय विद्महे वासु देवाय धीमहि ।

तन्नो विष्णुः प्रचोदयात्।

१३-याःफलिनीरिति नाळिकेरफलं निक्षिप्य।

ओं याः फलनीर्या अफलाय पुष्पायाश्च पुष्पिणीः।

बृहस्पतिःप्रसूतास्तानोमुञ्चन्त्वँहसः

१४-हिरण्यपात्रमिति रत्नानि निक्षिप्य।

हिरण्यपात्रंमधोःपूर्णंददाति। मधव्योसानीति।

एकदा बृह्मण उपहरति एकदैव यजमानःआयुःतेजोददाति।

तत्कलशे पूर्ववत् आधारादि पद्मान्तमभ्यर्च्य।

भगवतः दक्षिणहस्तात् **ओंसहस्रार हुंफट्** । **ओं नमो भगवते महासुदर्शनाय** आगच्छ इत्यावाह्य।

पूर्ववत् अर्घ्यादिभिः सम्पूज्य नीराज्य।

## अभिमन्त्रणम्

ओं भवद्भिः अनुज्ञातः वासुदेवः पुण्याहम् वाचयिष्ये । ओम् वाच्यताम्।

| | | |
|---|---|---|
| ओम् आपः | - | शिव आपस्सन्तु। |
| ओम् गन्धाः | - | सुगन्धाः पान्तु। |
| ओम् सुमनसः | - | सौमनस्यमस्तु। |
| ओमक्षतं | - | अक्षतंचारिष्टंचास्तु। |
| ओमन्वाहार्यः | - | सुमन्वाहार्योस्तु। |

ओम् दक्षिणाः - स्वस्ति दक्षिणाः पान्तु।
ओम् दर्भाः - स्वस्तिदर्भाःपान्तु। ओम् बहुदेयमस्तु।

ओम् ओम् ओम् ओंनमोभगवतेवासुदेवाय, भगवतोबलेन , भगवतोवीर्येण , भगवतस्तेजसा , भगवतः कर्मणा , भगवतः कर्मकरिष्यामि।

वासुदेवस्य भगवान् पवित्रम् । वासुदेवः पवित्रम् । शतधाऽरम् । सहस्रधारम् अपरिमितधाऽरम् । अच्छिद्रम् । अक्लिष्टम् । अक्षय्यम् । अनन्तम् अरिष्टम् अच्युतम् परमं पवित्रम् । भगवान् वासुदेवः पुनातु ।

ओं भूर्भुवस्वः तत्सवितुर्वरेण्यम् भर्गो देवस्यधीमहि धीयोयोनः प्रचोदयात्।
ओं नारायणायविद्महे वासुदेवाय धीमहि तन्नोविष्णुःप्रचोदयात्।
ओं सुदर्शनाय विद्महे महाज्वालाय धीमहि। तन्नश्चक्रः प्रचोदयात्।

ओं तत्सत् । पुण्याहं भवन्तो ब्रुवन्तु । पुण्याहमिति या मन्त्रणार्थे। परिकल्प्यदेवमादितः । प्रयोगस्यधीमहि इति । मङ्गलानि नामानि । प्रयुञ्जते मनुष्याः । युष्मादादिति मेयोदिताः । एतत्भक्तानाम् । तन्मेयथास्यदिती भगवान् ।
दिती एषभगवान्।श्रेष्टंमङ्गलम्।सर्वशक्तिःयुक्तो योगः ।
सर्वशक्तिर्भवतु। स एव हि तत्वम् । सहिते सृष्टप् । कर्म कर्म गृहपतिरेतेनैव हि मन्त्रेण । तथैवऋत्विजःसर्वे तथा यज्ञो महीयते ।
यदृचा वा-यजुषा वा- साम्ना वा- अभिमन्त्र्यते। सर्वं तद्ब्रह्मणेतेन ह्यचदत्वाय कल्प्यते। य इमे सर्वभूतानाम् भगवान् दैवब्राह्मणो भगवान् । पुत्र पौत्रश्र्च । दीर्घमायुरवाप्नुयादिति । यासी यासी।शुचिर्भूतिर्भूतयेए।

ओं भगवान् वासुदेवोभगवान् , संकर्षणोभगवान् , प्रद्युम्नो भगवान् , अनिरुद्धो भगवान् , एषभगवान् , एषवासुदेवः। एष आसापराकृतिः । एषतत्परब्रह्मा । एषप्रभवा । एषयोगा एषयोव्यः । एष आत्मा चतुर्विधः सर्वत्र सर्वदर्शी, सर्वेश्वरेश्वरः । सर्वशक्तिः समृद्धिमान्। । एषावाऋद्धिमन्वाप्तो , वशीस्वाधीरनन्तो , व्यपगत निद्रा भयक्रोधो , व्यपगतेच्चः। अखिलक्लिष्ठम् । अव्याधिर्निर्दोषो । निररिष्टो निरवद्यः।

एनभगवन्तम् । वासुदेव एनम् । विदुर्य एनं । विदुस्त एनम् । विधिर्नुते विधिरिति मह्यम् । दीर्घमायुष्यमस्तु । शिवाभगवन् पानीयापस्सन्तु ।

सुमनसो भगवान् सौमनस्य मस्तु । सुमनसोभगवन्तो वासुदेव सङ्कर्षण प्रद्युम्न अनिरुद्धाः सन्तु । अक्षतैः अक्षतंचाऽरिष्टंचास्तु । अक्षतमरोगम् कुशलम् । भगवतोरिष्टम् , ओंभगवान् प्रद्युम्न मनः समाधीयताम् । समाहितमनसस्मः । अस्मिन् ग्रामे सर्वेषां श्रीवैष्णवानाम् ब्राह्मणानाम् गवान्गणानां च, राष्ट्रं च, दनं च, कुलं च धर्मश्च अहरहरभिवर्धताम् । एतत्शुध्यर्थे भगवत्विशेषिकेण भगवत्प्रीति माङ्गल्या आयुरारोग्य सिद्धये सम्पद्यन्ताम् । धन धान्य समृद्धये सम्पद्यन्ताम् ।

एषाकृतिरेषभगवान् वासुदेवः। एषाकृतिरेषभगवान् सङ्कर्षणः। एषाकृतिरेषभगवान् प्रद्युम्नः।एषाकृतिरेषभगवान् अनिरुद्धः। ओं महापुरुषो वर्धताम्, सत्यो वर्धताम्, अच्युतोवर्धताम्, अनन्तो वर्धताम्। वर्धन्तां। महापुरुषः शान्तिरस्तु। भगवन्तं सर्वे वासुदेवाद्याः भगवत्प्रीति कर्मणानेन ओं पुरुषःप्रियताम्, ओं सत्यःप्रियताम्, ओं अच्युतः प्रियताम्, ओं अनन्तःप्रियताम्।प्रियन्ताम्। महापुरुषः शान्तिरस्तु। न्यूनातिरिक्तं यावद्वर्षशतं सम्पूर्णमस्तु।

ओं शुद्धये वासुदेवोस्तु लाङ्गलि शुद्धये सदा।
प्रद्युम्नशुद्धयेचास्तु अनिरुद्धोस्तु शुद्धये।।
कर्मणाम् शुद्धयेचास्तु विष्णुसर्वत्र सम्स्थितः।
दोषाणां हरणायास्तु गदासिह्माकृतिर्मम।।
सर्वत्र रक्षणायास्तु गदाचक्रासिबृत्सदा।
यागेषु च रधश्यामः नगरग्राम वासिनाम्।।
तुष्टयेपुष्टयेचास्तु आयुरारोग्यसिद्धये।
गुरूणां साधकेन्द्राणाम् पञ्चकालरथात्मनाम्।।
सर्वदा पुत्रमित्राणाम् दासी दासगवामपि।

वेदशास्त्रागमादीनाम् अस्तु त्राणाय सर्वदा।।
अविघ्नमनिशं चास्तु सम्पदंचोत्तरोत्तरम्।
पुण्याहंशुद्धयेचास्तु वासुदेवादिमूर्तिमान्।।
शङ्खचक्र गदापद्म युक्तस्सर्वेश्वरेश्वरः।
प्रियतां भगवान् देवो लाङ्गलिप्रियतां सदा।।
प्रद्युम्नःप्रियतां नित्यमनिरुद्धस्सुरेश्वरः।
नारायण सुरेचास्तु कर्मणांपूरणाय च।।
न्यूनाधिकानां शान्त्यर्थम् प्रियतां भगवान् प्रभुः।

ओं यत्पुण्यं नक्षऽत्रम्। तद्भद्कुर्वीतोपव्युषम्।यथावैस्सुर्य । उदेति। अथ नक्षत्रम्नैति। यावति तत्रसूरोगच्छेत् यत्रजगन्यं पश्चेत्।तावतिकुर्वीत यत्कारीस्स्यत्। पुण्याह एव कुरुते।कर्मणःपुण्याहं भवन्तोब्रुवन्तु।पुण्याहं कर्मणोऽस्तु।

स्वस्तिन इन्द्रो वृद्धश्रवाः।स्वस्तिनःपूषा विश्ववेदाः। स्वस्तिस्ताक्ष्र्यो अरिष्टनेमिः। स्वस्तिनो बृहस्पतिर्ददातु।कर्मणऋद्धिम् भवन्तो ब्रुवन्तु। कर्मण ऋध्यताम्।

ओं ऋध्यामस्तोमम्। तनूयामवाचम्। मानोमन्त्रम् सारथेहोपयातम्। यशोन पक्कम्मधुघोष्यन्तराः।भूतांशोऽश्विनोकाममप्राः।

पुण्याह एव कुरुते।ओम् कर्मणः पुण्याहम् भवन्तोब्रुवन्तु।ऋद्धिस्समृद्धिः। शिवंकर्मास्तु। वासुदेवःप्रियतां प्रियतां भगवान् वासुदेवः। भगवान् पवित्रम्। वासुदेवःपवित्रम्। शतधाऽरम्।सहस्त्रधाऽरम्ऽपरिमितधाऽरम्। अच्छिद्रम्। अक्लिष्टम्,अक्ष्य्यम्,अनन्तम्, अरिष्टम्, अच्युतम्, परमंपवित्रम्, भगवान् वासुदेवःपुनातु। ओं भूर्भुवस्स्वः।

पवित्रं भगवानस्तु वासुदेवः परो गुरुः ।
अस्तुसंकर्ष्णो देवः पवित्रं परमो विभुः ।
प्रद्युम्नोस्तु पवित्रं वै साक्षीविश्वस्य साम्प्रतम् ।
पवित्रमनिरुद्धोस्तु विश्वत्राता जगत्पतिः ।
शुद्धयेस्तु हृषीकेशो वासुदेवोस्तु शुद्धये ।
सदा सङ्कर्षणोदेवः शुद्धयेस्तु सदा मम ।
प्रद्युम्नशुद्धयेचास्तु सर्वत्र मम सर्वदा ।
शुद्धयेस्तु अनिरुद्धोस्तु शुद्धयेस्तु जगत्पतिः ।
शुद्धये विष्णुरस्त्वाद्या शुद्धये मधुसूदनः ।

ओं शान्तिः। शान्तिः । शान्तिः ।

अस्मिन्कुम्भे आवाहितं सुदर्शनं समस्त राजोपचारपूजां समर्पयामि। इति पुनः अर्घ्यादिभिः संपूज्यनीराज्य । यथास्थानं प्रतिष्ठापयामि । शोभनार्थे क्षेमाय पुनरागमनाय च ।

प्रोक्षणमन्त्राः

1. ओं स्थानानि देशानि सहस्त्रबाहुर् वरेण्यनामा विरजाम्सि नामा ।
तेभ्यो नमस्ते मधुसूदनाय तत्राभिमानम् परिरक्षयन्ताम् ।
प्रोक्षणमन्त्राः ।

2. ओं वास्तोष्पतेप्रतिजानीह्यस्मान्स्वा वेदोऽनमीवो भवानः ।
यत्वेमहे प्रतितन्नो जुषस्व शन्नएधि द्विपदे. शंचतुष्पदे ।

3. ओं वास्तोष्पते शग्मयासँसदाते सक्षीमहिरण्वया गातुमत्याः आवाहक्षेम उतयोगेवरण्णो यूयं पातस्वस्तिभिस्सदानः। अमीवः वास्तोष्पते विश्वारूपाण्याविशन्।सखासु सेव एधि नः ।

शुभँ शुभम् ।

**अपवित्रः पवित्रो वा सर्वावस्तङ्गतोपि वा ।**
**यस्स्मरेत् पुण्डरीकाक्षम् स बाह्याभ्यन्तरश्शुचिः ।**

भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः । हरिः ओं ।

इति आत्मानं सर्वत्र च प्रोक्ष्य ।

इति वासुदेव पुण्यावाचनम् सम्पूर्णम्।

अथ अग्निकार्य विधिः उच्यते ।

**********************************************

श्रीः

श्रीमते रामानुजाय नमः

# अग्नि कार्य विधिः

अथ अग्नि कार्य विधिः उच्यते । आचार्यः अग्नयागार द्वारे ओं द्रां चण्डाय नमः। ओं द्रों प्रचण्डाय नमः। मध्ये ओं क्षं गरुडाय नमः इत्यभ्यर्च्य । अन्तः प्रविश्य। अग्नि कुण्डस्य पश्चिमे भागे प्राङ्मुखमासने उपविश्य। ओं असुरान्त चक्राय स्वाहा अस्त्राय फट् । इति कुण्डस्य संमार्जनालेपने कृत्वा।

प्राच्यां शिरस्समाख्यातं बाहु युग्मं व्यवस्थितम्।
ऐशान्याग्नेय कोणे तु जङ्घे वायव्य नैरृते।
उदरं कुण्ड मित्युक्तं योनिर्योनौ विधीयते।

कुण्डमेवं ध्यात्वा । अस्य देव देवस्य भगवतो वासुदेवस्य श्री भूमि नीळा नायिका समेत श्रीदेवाधिराज स्वामि सन्निधौ नित्याराधनाङ्गं होमम् करिष्ये। इति सङ्कल्प्य। पुण्याहं वाचयित्वा। तज्जलेन ओं भूर्भुवस्सुवः इति प्रोक्षणा अवोक्षणा अभ्युक्षणानि कृत्व। आत्मनो दक्षिणे पार्श्वे पुष्प भाजनं; वामेच । अन्यानि होमद्रव्याणि निक्षिप्य। ओं आचक्राय स्वाहेति स्वस्व मन्त्र न्यासं कृत्वा। प्रागग्रान् षड्दर्भान् आस्तीर्य। तेषु १. आज्य पात्रं २. चरु स्थालि ३. प्रोक्षणी ४. प्रणीता ५. समित् ६. कुश ७. तण्डुल ८.परिधि ९ स्रुक् १०. स्रुव ११. दर्वी १२ अग्नेर्विहरण १३.व्यजन १४. मेक्षण १५. शुष्ककाष्ठ १५.घण्ट १७. अक्षत १८ गन्ध द्रव्याणि यथासंभवम् न्यञ्चिन्निधाय। कुण्ड मध्ये ओं नमोनारायणायेति तिस्रो रेखाः दक्षिणमारभ्य उत्तरान्तं प्रागायताः पश्चिमादि पूर्वान्तं उदगायताः तावतिर्लिखित्वा। ओं इडायै नमः । ओं पिङ्गळायै नमः। ओं सुषुम्णायै नमः। इत्यभ्यर्च्य। दर्भ मुष्टिभिः कुण्डस्य पर्यग्नि करणं कृत्वा। कुण्ड मध्ये भद्रासनं कल्पयित्वा। ओं भद्रासनाय नमः ओं विमलासनाय नमः। इत्यभ्यर्च्य। तस्मिन्

कुण्ड मध्ये तथा लक्ष्मीं सर्वाभरण भूषितां ।
सर्वावयव सम्पूर्णां ऋतुस्नातां विचिन्तयेत्।

देवं नारायणं ध्यात्वा सर्व लक्षण लक्षितं ।
चतुर्बाहुं विशालाक्षं कोमलं पीतवाससम्।
शङ्खचक्रगदापद्मैः चतुर्भिः कृतलक्षणम्.
कंजपाणिं तथापादं श्रीवत्साङ्कित वक्षसम्।
काळमेघनिभं शान्तं चन्द्रबिम्बनिभाननम्।
हार केयूर सम्युक्तं किरीटेनोप शोभितम्।

एवं ध्यात्वा। तत्र तयोः सङ्गमं विचिन्त्य। अरणेः सूर्यकान्ताश्मनो वा अग्निं द्वादशाक्षरेण मथित्वा। श्रोत्रियागाराद्वा समाहृत्य। भूर्भुवस्सुवरिति प्रोक्ष्य। अग्नि बीजस्य। काश्यप ऋषिः। त्रिष्टुप्छन्दः। अग्निर्देवता। होमार्थे विनियोगः। इति दिव्याग्निं ध्यात्वा। ओं रां इत्यादि षडङ्ग न्यासं कृत्वा। ओं रम् अग्नये नमः । ओं असुरान्त चक्रायस्वाहेति इन्धनानि अग्नौ निक्षिप्य। वायु बीजस्य। किष्किन्ध ऋषिः जगतीछन्दः । वायुर्देवता। अग्नि उद्दीपने विनियोगः । इति कुण्ड मद्ये अग्निं निक्षिप्य।

ओं वैश्वानराय विद्महे लालीलाय धीमहि। तन्नो अग्निःप्रचोदयात्।

ओं नमोभगवते वासुदेवाय रं अग्नये नमः । इत्यभ्यर्च्य । कुण्डस्य परितः त्रिभिर्दर्भैः परिस्तीर्य । ओं वासु देवाय नमः । ओं सङ्कर्षणाय नमः।
ओं प्रद्युम्नाय नमः। ओं अनिरुद्धाय नमः इत्यभ्यर्च्य।

## <u>प्रणीता पूजनं</u>

प्रणीता पात्रं आत्मनः पुरतः निक्षिप्य । प्रोक्षणीम् आत्मनः अग्रे निदाय । द्वि दर्भ कृत प्रादेशमानकूर्चं निक्षिप्य । त्रिभिर्दर्भैः पवित्रैः आच्छाद्य । अङ्गुष्टाऽनामिकाभ्यां त्रिरुत्पूर्य । तज्जलेन सत्यंत्वर्तेन परिषिञ्चामि इति कुण्डस्य प्रादक्षिण्येन स्रावयित्वा । प्रणीता पात्रं पुनरद्भिः सम्पूर्य । ओं कौमोदकी शङ्खचक्रपद्मधराय वासुदेवाय नमः । इत्यावाह्य । अग्नेरैशान्यां दर्भ विष्टरे तां सम्स्थाप्य।

## ब्रह्म पूजनं

अग्नेर्दक्षिणतो दर्भेषु द्वादश दर्भ कृत कूर्चं निक्षिप्य। तस्मिन्

**चतुर्मुखं भुज द्वन्द्वं साक्षमाला कमण्डलम्।**

**हेमाभं शक्ति सहितं ब्रह्माणं तु विचिन्तयेत् ।**

ओं कम् ब्रह्मणे नमः । इत्यावाह्य अभ्यर्च्य ।

## आज्य सम्स्कारम्

अग्नेरुत्तरतो अङ्गारान्निरूप्य। तेषु आज्य पात्रं निधाय। आज्य पात्रे ओं अं विष्णवे नमः। इत्यभ्यर्च्य । ओं आप्यायस्व समेतु ते । विश्वतस्सोमवृष्णियम्। भवावाजस्य सङ्कते । इति मन्त्रेण निषिच्य । दर्भयुग्मनिर्मितं प्रादेशसम्मितं कूर्चम् निधाय । दर्भानादीप्य दर्शयित्व ।

**श्रीमन्नारायण चरणौ शरणं प्रपद्ये । श्रीमते नारायणाय नमः ।**

इति त्रि परिभ्रमणम् कृत्वा। विसृज्य। आज्यं सुरभि मुद्रया अमृती कृत्य। चक्र मुद्रां प्रदर्श्य। अङ्गारान् पुनः अग्नौ सम्योज्य। त्रिभिर्दर्भैः आछाद्य। अग्नेः अष्टासु दिक्षु इन्द्रादीन् आवाह्य। सम्पूज्य।

## स्रुक् स्रुव संस्कारम्

उष्णोदकेन स्रुक्स्रुवौ प्रक्षाळ्य । दर्भ पञ्च कृत कूर्चेन स्रुक् स्रुवयोः मूलं मूलेन अस्त्राय फट् मध्यं मध्येनअस्त्राय फट् अग्रं अग्रेणअस्त्राय फट् इति सम्मार्ज्य। आत्मनः उदीच्यां स्रुक्स्रुवौ निधाय । कूर्च ग्रन्धि विसृज्य अग्नौ निक्षिप्य । स्रुवेन आज्यमादाय । होम द्रव्येषु चरू च ओं आप्यायस्वेति मन्त्रेन सम्सिच्य ।

ओं अं विष्णवे नमः । इति अभ्यर्च्य

## परिधि पूजनं

कुण्डस्य पश्चिमे कुण्डायाम सदृशं अङ्गुष्ट नहनं ;

दक्षिणे तस्मात् अङ्गुलि हीनं मद्यमाङ्गुलिनाहं ;

उत्तरे तस्मात् अङ्गुलि हीनं कनिष्टा नहकं ;

परिधि त्रयम् क्रमेण **ओं श्रीधराय नमः । ओं नृसिम्हाय नमः। ओं हयग्रीवाय नमः।** इत्यावाह्य अभ्यर्च्य । मध्यमं परिधीं प्रणवेन उप स्पृश्य । अग्नीशानकोणयोः आघार समिधौ च तत्तन्मन्त्रेण स्थाप्य। ओं अदितेनु मन्यस्व। अनुमतेनुमन्यस्व। ओं सरस्वतेनुमन्यस्व। देवसवितःप्रसूव। इति मन्त्रेण समन्ततः परिषिच्य। अनुयाज समिधं प्रणीतां मुखे निधाय। पञ्च दशैकतः गो घृताक्ता समिधः मुष्ठि मुद्रया प्रजापतिः अन्तर्यामिने ओं पद्मनाभाय स्वाहा। इति हुत्वा। कुश कूर्च वेष्टितो वाम कर तले घृत पात्रं निधाय। ओं प्रजापतये स्वाहा इति प्रथमं नैऋत्यादि ईशानन्तं। ओं इन्द्राय स्वाहा इति द्वितीयं वायव्यदाग्नेयान्तं । आघारं हुत्वा। ततः अग्ना उत्तरे ओं अग्नये स्वाहा अग्नये इदं न मम। दक्षिणे ओं सोमाय स्वाहा। सोमाय इदं न मम। मध्ये ओं भू स्वाहा अग्नये इदम् न मम । ओं भुव स्वाहा वायवे इदम् न मम। ओं सुवस्वाहा सूर्याय इदं न मम। ओं भूर्भुव स्सुव स्वाहा ओं प्रजापतये इदं न मम। इति व्याहृतिभिश्च हुत्वा।

## अग्नि ध्यानम्

### बालाग्निः (दीक्षा, शान्ति, प्रतिष्ठादि कालेषु)

द्वि शीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकं।
वरदं शक्ति पाणिं च बिभ्राणं स्रुक्स्रुवौ तथा।
अभीतिदं चर्मधरं वामे चाज्यधरं करे।
काळी कराळी सुमना लोहिता धूम्रयेवहि।
स्फुलिङ्गिनी विश्वरूपा सप्तजिह्वाःप्रकीर्तिताः।
काल्यास्तु मध्यमं स्थानं कराल्याःपूर्वदिग्भवेत्।
मनोजवायाश्चाग्नेयां लोहितायास्तु वारुणे।
सुधूम्रासोमनिलया स्फुलिङ्गिन्यनिलाश्रया।
ऐशान्यं विश्वरूपी तु एवं स्थानं स्मरेत् क्रमात्।
जिह्वायां दक्षिणे वक्रे धूम्रायां मारणादिकम्।
लोहितायां वशीकारः काल्यां कर्म च शान्तिकम्।

सर्वसिद्धिः स्फुलिङ्गिन्यां आनने दक्षिणेतरे।
विश्वरूपरसञ्ज्ञायां अणिमादिमहाफलम्।
करालिका विजयदा पुष्टिदा च मनोजवा।
कार्ष्ण्यं लौहित्यमेतासां वर्णंश्यामलमेव च।
स्फुलिङ्गरूपं च ततः वर्णः स्फटिकसन्निभः।
तपनीयनिभः प्रोक्तः जिह्वानामानुपूर्वशः।

एवं बालाग्निं ध्यात्वा।

**यौवनाग्निः( उत्सवादि कालेषु)**

त्रिनेत्रं पञ्चवक्त्राढ्यं रक्त वर्णं दिशा भुजम्.
त्रिमेखलं त्रिपादं च सप्तजिह्वा समन्वितम्।
उपवीतसमायुक्तं जटामकुटमण्डितम्।
चक्रंपरशुखड्गं च वज्रं चाऽभयदक्षिणे।
टंकं पाशाब्जचक्रं च वरदं वह्निवामके।
स्वाहादक्षिणपार्श्वे तु स्वधा वामे तथैव च।
हिरण्याकनकाकारा कृष्णा चैव तु सुप्रभा।
अतिरिक्तो बहुरूपासप्तजिह्वाः प्रकीर्तिताः।
मेषारूढं यौवनाग्निं ध्यायेदुत्सव कर्मणि।

एवं उत्सवाग्निं ध्यात्वा।

**वृद्धाग्निः (नित्यहोम कुण्डे)**

चतुर्भुजं त्रिनेत्रं च एकवक्त्रं जटाधरम्।
शूलं परशु खड्गं च अभयं वरदान्वितम्।
सप्तजिह्वान्वितं शक्तिं उपवीतोत्तरीयकम्।
मेषासीनं सितं नित्ये शिवं वृद्धाग्निमारभेत्।
नित्याग्निः वृद्ध इत्युक्तः उत्सवाग्निर्युवाभवेत् ।
दीक्षाशान्तिप्रतिष्ठाग्निः बाल इत्यभिधीयते।

एवं तत्तत्कर्मानुगुणं अग्निं ध्यात्वा । इत्यभ्य र्च्य। ओं रं बालाग्नये नमः। इत्यभ्यर्च्य । तिलान् आघार सम्मिश्रान् अग्नेर्जातशान्तये द्वादशाक्षरेण अष्टोत्तर शताहुतीम् हुत्वा। अग्नि मध्ये गर्भादानादि कर्मणा संस्करिष्ये इति सङ्कल्प्य। ओं अदितेनुमन्यस्व इत्यादिना परिषिच्य।

ओं ओं ओं स्वाहा । ओं नं ओं स्वाहा। ओं मों ओं स्वाहा। ओं भं ओं स्वाहा। ओं गं ओं स्वाहा। ओं वं ओं स्वाहा। ओं तें ओं स्वाहा। ओं वाम् ओं स्वाहा। ओं सु ओं स्वाहा। ओं दें ओं स्वाहा। ओं वां ओं स्वाहा। ओं यं ओं स्वाहा।

इति हुत्वा । ओं अदितेन्व मग्गुस्थाः ओं अनुमतेऽन्व मग्गुस्थाः। ओं सरस्वतेऽन्व मग्गुस्थाः। ओं देवसवित प्रासावीः। इति समन्ततः परिषिच्य।

एवं पुम्सवन, सीमन्तोन्नयन, जातकर्म, नामकरण, अन्नप्राशन, चौळ, उपनयन,प्राजापत्य, सौम्यक, वैष्णव, शुक्रीय, गोदान, उपनिषक्रमन, समावर्तन, विवाहादि कर्मणा सम्स्करिष्ये इति सङ्कल्पादि परिषेचन पूर्वकं प्रत्येकं द्वादशाक्षरेण हुत्वा।

## सप्तजिह्वा हवनम्

अग्नेः प्रशमनार्थय सप्त जिह्वा हवनं करिष्ये इति सङ्कल्प्य। परिषिच्य। काळ्यां समिधः मूल मंत्रेण । मनोजवायां प्रणवेन आज्यं। सुलोहितायां वासुदेव मन्त्रेण अन्नं। सुधूम्रायां सङ्कर्षण मंत्रेण लाजं । स्फुलिङ्गिन्यां प्रद्युम्न मंत्रेण तिलं । विश्वरूपायां अनिरुद्ध मन्त्रेण दुग्धं कराळ्यां पुम्सूक्तेन मधुना । प्रत्येकं षोडशाहुतिर्हुत्वा। परिषिच्य।

## अग्नौ आराधनम्

तदनु अग्नि मध्ये योग पीठं सङ्कल्प्य । अस्य देवदेवस्य भगवतोवासु देवस्य .... स्वामि सन्निधौ नित्य होमाङ्ग आधारादि पद्मान्त होमम् करिष्ये. इति सङ्कल्प्य। ओं ह्रीं आधार शक्त्यै स्वाहा। इत्यादीना मारभ्य ..... ओं अव्यक्त पद्मायै स्वाहा। इति

पर्यन्तं प्रत्येकं आज्येन हुत्वा। तन्मध्ये हृदयस्थं देवं आवाह्य। आवाहनादि षण्मुद्रां प्रदर्श्य। (ओं ओं परमधामावस्थित मदनुग्रहकाम्यय उद्यतावतार इहाऽभिमतसिद्धिद **मन्त्रशरीरे ओं नमो.......आगच्छ इत्यावाह्य।**

स्वामिन् सर्व जगन्नाथ यावद्धोमावसानकं ।
तावत्वं भक्ति भावेन वह्नौ त्वं संनिधिं कुरु।

इति यागावसानिकं प्राथ्र्य । नाभ्यादि हृदयान्तं पूर्ववत् (द्वादशाक्षरेण) अष्टाक्षरेण न्यासं कृत्वा । किरीटादि मुद्रां प्रदश्र्य । अर्घ्यादि नैवेद्यान्तं तत्तन्मन्त्रेन सकृत्सकृत् आज्येन हुत्व । जपार्ताञ्च जुहुयात् । परिषेचनं । **समिद्दळ पुष्प बीज फलैश्च परिवार मन्त्रेण** हुत्वा। तद्विषये।

ओं श्रीं श्रियै स्वाहा। इति तुळसी दळैः अष्ट वारं हुनेत्।

ओं चण्डाय स्वाहा। ओं प्रचण्डाय स्वाहा। - इति समिधा अष्टाहुतिर्हुत्वा।

ओं जयाय स्वाहा ओं विजयाय स्वाहा। - इति बीजैः अष्टाहुतिर्हुत्वा।

ओं कुमुदाय स्वाहा ओं कुमुदाक्षाय स्वाहा ओं विष्वक्सेनाय स्वाहा। - इति फलैः पृथक्पृथक् अष्टाहुतिर्हुत्वा।

आज्यावसिक्तं चरुं पुरुष सूक्तेन मूलमन्त्रेण सह ग्रासमुद्रया पलाशपत्रेन वा प्रत्यर्धं षोडशाहुति र्जुहुयात्।

## स्विष्टकृद्धवनं

अग्नेः स्विष्टकृद्धवनं करिष्ये इति संकल्प्य। परिषिच्य।

मातुलङ्ग फलाकारं चरोः पिण्डं स्त्रुगावर्ते निक्षिप्य। समिद्दर्भ कुसुमं नासिकाग्रान्तं उधृत्य। "**ओं अतो देवा अवन्तुनो** " इति मन्त्रेण ओं अग्नये स्विष्टकृते स्वाहा इति हुत्वा। परिषिच्य।

## प्रायश्चित्तार्थं शान्ति होमं

एतस्मिन् होममध्ये सम्भावित मन्त्रलोप तन्त्रलोप द्रव्यलोप क्रियालोप स्वरलोप प्रायश्चित्तार्थं पञ्चोपनिषणमन्त्रेण शान्ति होमं करिष्ये । इति सङ्कल्प्य। परिषिच्य।

ओं षौं नमः पराय परमेष्ठ्यात्मने वासुदेवाय स्वाहा।

ओं यां नमः पराय पुरुषात्मने सङ्कर्षणाय स्वाहा।

ओं रां नमःपराय विश्वात्मने प्रद्युम्नाय स्वाहा।

ओं वां नमः पराय निवृत्यात्मने अनिरुद्धाय स्वाहा।

ओं लां नमः पराय सर्वात्मने श्रीमते नारायणाय स्वाहा।

सर्वं श्री विष्णवे स्वाह। विष्णवे परमात्मने इदम्।

इति प्रत्येकं चतुराहुतीर्हुत्वा। परिषिच्य। पूर्णाहुतिम् कृत्वा। परिषेचनं

1. ओं इदं विष्णुर्विचक्रमे .........परमं पदम्।

2. ओं पूर्णाहुतिमुत्तमां जुहोति। सर्वं वै पूर्णाहुतिः। सर्वमेवाप्नोति। अतो इयं वै पूर्णाहुतिः अस्यामेव प्रति तिष्ठति।

3. पूर्णमदः पूर्णमिदः पूर्णात्पूर्णमदुच्यते। पूर्णस्य पूर्ण मादाय पूर्णमेवाव सिश्यते। इति

4. ओं सप्तते अग्ने समिधस्सप्तजिह्वा स्सप्त ऋषय स्सप्तधाम प्रियाणि । सप्त होत्रास्सप्त धा त्वायजन्ति सप्तयोनी रापृणस्व घृतेन स्वाहा। इति च पूर्णाहुतिम् कृत्वा। ओं अदितेऽन्व मग्गुस्थाः । ओं अनुमतेन्व मग्गुस्थाः। ओं सरस्वतेन्व मग्गुस्थाः। देवसवितःप्रासावीः। इति समन्ततः परिषिच्य। आज्य पात्रं पुरतः कृत्वा दक्षिणे स्रुवं उत्तरे स्रुचौ निधाय उपयुक्त कुशान् सर्वान् हस्तेनादाय । आज्य पात्रे मूलं स्रुचोर्मध्ये मध्यं स्रुग्गर्तें अग्रं । एवं त्रिः कृत्वा। अग्नौनिक्षिप्य।

## अग्नि उद्वासनं

आत्मनः अग्रे प्रणीतां समस्थाप्य। प्रोक्षणी जलं सम्योज्य। पूर्वादि सोमान्तं परिषिच्य आत्मानञ्च प्रोक्ष्य। ओं कं ब्रह्मणे नमः यथास्थानं प्रतिष्ठापयामि। इति ब्रह्माणमुद्वास्य। अग्नि मध्यस्थं देवं हृदि विसृज्य। उप युक्त कुशान् सर्वान् अग्नौ निक्षिप्य। स्रुचं जलेन सम्पूर्य वर्मणा परिषिच्य । शिरसि भस्मना

ओं बृहत्साम क्षत्र भृत् वृद्ववृष्णियं । तृष्टु बोज श्शुभित मुग्र वीरं । इन्द्र स्तोमेन पञ्च दशेन । मध्यमिदं वातेन सगरेण रक्षा। इति मन्त्रेन तिलकं कृत्वा। ओं यज्ञेन यज्ञं

इति मन्त्रेण नीराज्य ।

ओं भक्त्य  यदग्नौ विहितं यथा शक्ति यथा विधि ।
आराधनं तथैवेदम् गृहाण पुरुषोत्तम। इति भगवन्तं प्रार्थ्य।

ओं अग्ने नय सुपथाराये अस्मान् विश्वानि देव वयुनानि विद्वान्.। युयोध्यस्मान् जुहुराण मेनो भूयिष्ठान्ते नम उक्तिम्विदेम। इति प्रार्थ्य ।

ओं नमस्ते गार्ह पत्याय नमस्ते दक्षिणाग्नये ।
नम आहवनीयाय महा वेध्यै नमोनमः।
काण्डद्वयोप पाद्याय कर्मब्रह्मस्वरूपिणे।
स्वर्गापवर्ग रूपाय यज्ञेशाय नमो नमः।
यज्ञेशाच्युत गोविन्द माधवानन्त केशव।
कृष्णविष्णो हृषीकेश वासुदेव नमोऽस्तु ते।
मन्त्र हीनं क्रिया हीनं भक्ति हीनं हुताशन।
यद्धुदन्तु मया देवा परि पूर्णं तदस्तु ते.।
प्रायश्चित्तन्यशेषाणि तपःकर्मात्मकानिवै।
यानि तेषामशेषाणां कृष्णानुस्मरणम् परं।

श्री कृष्ण कृष्ण कृष्ण। इति अग्निउपस्ताणं कुर्यात् ।

। इति अग्नि कार्यसङ्ग्रहः।

। अथ महोत्सव विधिः उच्यते ।

******************************

श्रीः

श्रीमते रामानुजाय नमः

# महोत्सव विधिः

## भगवदनुज्ञाक्रमः

ओं लक्ष्मीनाथ कृपावलब्ध महती श्री पाञ्चरात्रागमान् ।
तत्तद्वैदिकतान्त्रिक प्रणयिनः पूज्याविलासाश्रयान् ।
भारद्वाजवदौपगायनसुधी शाण्डिल्य मौञ्ज्यायनान् ।
पञ्चर्षीन् सह कौशिकान् कुल गुरून् वंदे महायोगिनः ।

वंदेलक्ष्मीपतिंदेवं शङ्ख चक्र गदाधरं।
विद्यामूर्तिं हयग्रीवं शब्दार्थ ज्ञानलब्धये।
अमृतात्मा तमेघाभममृताहरणं विभुम्।
पाञ्चरात्रागमाचार्यं वन्दे वैकुण्ठभूपतिम्।

भगवन् देवदेवेश शङ्कचक्र गदाधर।
महोत्सवार्थं देवेश अनुज्ञां देहि मे प्रभो।
भगवन् देव देवेश प्रणतार्ति हरे तव।
अनुज्ञां देहिसर्वेश निर्विघ्नं कुरु मे प्रभो.। इति भगवन्तं प्रार्थ्य।

अस्य देवदेवस्य भगवतो वासुदेवस्य श्री भूमि नीळाहेमाब्ज नायिका समेत श्री देवाधिराज स्वामिनः राजराष्ट्राभिवृघ्यर्थं वैशाखमास नवदिन महोत्सव कर्मकर्तुं योग्यतासिद्दिश्च भूयादिति भवन्तो महान्तोऽनुगृह्णंतु। इति भगवन्तं विज्ञाप्य। फल वर्ग ताम्बूलादीनि निवेद्य। नीराज्य। सभ्यनुज्ञां कुर्यात्।

## सभा लक्षणमाह

श्रीशेष पक्षीश्वर पद्मगर्भ सेनेशमुख्यान्प्रतिबोदयन्तं।
श्रीपाञ्चरात्रागमाचार्यमाद्यं विष्णुं सदाहं शरणं प्रपद्ये।
महाजनौघाध मघौघसत्वं वेदोदकं शास्त्रतरङ्गशोभितं।
अलङ्घनीयं गुरुदेवतीर्थं सभा समुद्रं शिरसा नमामि।

ओं नमस्सतसे। नमस्सतसः पतये। नमस्सखीनाम्। पुरोगाणां चक्षुषे। नमोदिवे। नमः पृथिव्यै। सप्रतसभाम्मेगोपाय। एचसभ्या स्सभासतः। तानिन्द्रियाऽवतः कुरु। सर्वमायुरुपासतां। सर्वेभ्यः श्रीवैष्णवेभ्यः नमः। इति सर्वत्र अक्षतान् विकीर्य। अशेषे हेपरिषत्। भवत्पादमूले मयासमर्पितां इमां सौवर्णींदक्षिणां यत्किंचिद्दक्षिणां यथोक्तदक्षिणामिव ताम्बूलं च स्वीकृत्य। इति सर्वेषां वैष्णवाणाम् ब्राह्मणानां च ताम्बूलदक्षिणानि समर्प्य। अस्य देवदेवस्य भगवतो वासुदेवस्य..........स्वामि सन्निधौ........मास नवदिन महोत्सवारम्भ मुहूर्तः सुमुहूर्तः अस्त्विति भवन्तो महान्तोऽनुगृह्णंतु। तथास्तु ओं इति प्रतिवचनम्। दर्भेष्वासीनः दर्भान्दार्यमानः पवित्रपाणिः प्राणानायम्य। अस्यदेवदेवस्य ........ सन्निधौ महोत्सवाङ्गभूत अङ्कुरार्पणादि कर्म करिष्ये। तदङ्गं आत्मशुद्ध्यर्थं समस्त उपकरणानां शुद्ध्यर्थं वासुदेवपुण्याहवाचनं करिष्ये। सर्वकार्याणि निर्विघ्नेन परिसमाप्त्यर्थं श्री विष्वक्सेन पूजां करिष्ये तदङ्गं पात्रासाधनं च करिष्ये। इति सङ्कल्प्य। ओं विष्णो रराटमसि...........विष्णवेत्वा। ओं अर्घ्यं परिकल्पयामि इत्यादीनां पूर्ववत् पात्रासादनादि धूपदीपान्तं सम्पूज्य।

## विष्वक्सेन पूजाविधिः

स्तण्डिले षोडश दर्भकृतकूर्चं निधाय। तत्कूर्चे ओं भूःविष्वक्सेनं आवाहयामि। ओं भुवः विष्वक्सेनं आवाहयामि। ओं सुवः विष्वक्सेनं आवाहयामि। ओं भूर्भुवस्सुवः विष्वक्सेनं आवाहयामि।

इत्यावाह्य। अभ्यर्च्य। आवाहनादि षण्मुद्रां प्रदर्श्य।

भगवदाराधनवत् पूजयित्वा ।

1. ओं श्रीमते नमः ।
2. ओं विष्वक्सेनाय नमः ।
3. ओं सूत्रवती समेताय नमः ।
4. ओं सेनेशाय नमः ।
5. ओं सर्वपालकाय नमः ।
6. ओं शोभनाङ्गाय नमः ।
7. ओं मणिकुण्डलधराय नमः ।
8. ओं तप्तकाञ्चनभूषणाय नमः ।
9. ओं करिवक्त्राय नमः ।
10. ओं हरिप्रियाय नमः ।
11. ओं सर्वशास्त्रार्थतत्वज्ञाय नमः ।
12. ओं सर्वाभीष्टफ़लप्रदाय नमः ।
13. ओं ह्रीमतीसूत्रवती समेत श्री विष्वक्सेन स्वामिने नमः।

समस्त राजोपचार पूजां समर्पयामि।

**भव संचितपापौघ विध्वम्सन विचक्षणं।**
**विघ्नांधकार भास्वन्तं विष्वक्सेनंसमाश्रये।**

इति विष्णोरनुज्ञयायैव विष्वक्सेन महाबल । निर्याहि वैष्णवैःसार्धं मृत्संग्रहण कर्मणि। इति च प्रार्थ्य । नीराज्य । उत्तरेकर्मण्यविघ्नमस्तु । यथास्थानं प्रतिष्ठापयामि। इति हृदये विसृज्य। सर्वेषां भक्तजनानां श्रीविष्वक्सेनः प्रसादसिद्धिरस्तु। इति अक्षतान् विकीर्य। पुण्याहं वाचयित्वा।

## मृत्संग्रहण विधिः

अस्यदेवदेवस्यभगवतो..........सन्निधौ महोत्सवार्थं मृत्संग्रहण कर्मकरिष्ये इति संकल्प्य।

श्रीगृहे मण्टपे बिल्वे तुळसी यत्र तत्र च।
विष्णु क्षेत्रे तथादिव्ये मृत्संग्रहणमाचरेत्

इत्युक्तवत् श्री सुदर्शनं विष्वक्सेनेन सह मण्डपं गत्वा । स्वस्तिवाचनं शाकुनसूक्तं पंचशान्ति पठित्वा । पुण्याहं वाचयित्वा। भुवं नवताल प्रमाणेन विलिख्य । धान्य पीठे खनित्रं निक्षिप्य । सकूर्चं आम्रपल्लवानि च बध्वा । सर्वत्र

पुण्याह जलेन प्रोक्ष्य। आधारादि पद्मान्तं अभ्यर्च्य । सर्वेषां अपि भूसूक्तं जपित्वा। भू देव्याः आवाहनार्थं भुवौ आधारादि पद्मान्तं सम्पूज्य। **ओं ह्रीं भूम्यै नमः** आगच्छ इति आवाह्य । आवाहनादि षण्मुद्रां प्रदर्श्य । ओं ह्रां इत्यादि षडङ्गन्यासं कृत्वा। किरीट कमल वनमाल मुद्रां प्रदर्श्य।

खनित्रे **ओं यज्ञार्ह देहाय पुराणपुरुषाय महावराहाय नमः** आगच्छ आगच्छ इत्यावाह्य । अभ्यर्च्य । आवाहनादि षण्मुद्रां प्रदर्श्य । ओं हां इत्यादि षडङ्गन्यासं कृत्वा । वराहमुद्रां प्रदर्श्य । सर्वत्र अर्घ्यादिभिः सम्पूज्य । नीराज्य । मुद्गान्नं गुळापूपं निवेद्य । अष्टासु दिक्षु इन्द्रादीन् आवाह्य।

1. ओं पुरंदराय नमः।
2. ओं हुतावहाय नमः।
3. ओं पितृपतये नमः ।
4. ओं राक्षसाधिपाय नमः।
5. ओं अपाम्पतये नमः।
6. ओं समीरणाय नमः।
7. ओं वित्तपेशाय नमः।
8. ओं भागीरथिप्रियाय नमः।

इत्यावाह्य अभ्यर्च्य ।

ओं क्रोडावतार भूम्याप्त हिरण्याक्ष निबर्हण।
महोत्सवार्थं भगवतो मृत्सङ्ग्रहण कर्मणि।

इति खनित्रं प्रार्थ्य।

अस्य देव देवस्य .... स्वमिनः राजराष्ट्राभिवृध्यर्थं महोत्सवाङ्गं भू मृत्सङ्ग्रहण कर्म कर्तुं योग्यतासिद्धिमनुग्रहाणां। इति सभ्यनुज्ञां प्रार्थ्य । सर्वेषामपि
ओं उद्धृतासि वराहेण कृष्णेनशतबाहुणा।
**भूमिर्धेनुर्धरणी लोकधारिणी** । इति विष्णुगायत्र्या, भू गायत्र्यासह खनित्रेन भूम्याः मुख, बाहु, ऊरु ,स्तन, मध्य, जठर ,अङ्घ्रिषु मृदं आदाय। लोहजे वेत्रजे वा बाजने निक्षिप्य । दर्भैः वस्त्रेण च आच्छाद्य।

## अङ्कुरार्पण विधिः

श्री सुदर्शनः श्री विष्वक्सेनेन सह अङ्कुरार्पण मण्डपं नीत्वा । तत्र पुण्याहजलेन सर्वत्र प्रोक्ष्य । सोमकुम्भं पालिकादीनि च
ओं इन्द्रंनत्वा वाजिनमम। बृहतायांतृषुभाजिनो । योगानां ब्राह्मणादीनां ।
इति मन्त्रमुच्चार्य तन्तुणा परिवेष्ट्य। आम्रपल्लवं स कूर्चेन अलङ्कृत्य । नवधान्यानि च गोक्षीरेण "**ओं आप्यायस्व**" इति मन्त्रेण संक्षाळ्य । तस्मिन् केशवादि द्वादश नामानि आवाह्य।

तिल, सर्षप, नीवार, शाली, मुद्ग,प्रियङ्गु,माष, यव, वेणुधान्यानि सम्पूज्य। धान्यपीठ मध्ये सोमकुम्भं, अष्टसुदिक्षु अष्ट पालिकान् संस्थाप्य। सर्वत्र आधारादि पद्मान्तमभ्यर्च्य ।

भगवद्धाम नेत्रात् ओं सं सोमाय नमः । इति सोमकुम्भे आवाह्य। आवाहनादि षण्मुद्रान् प्रदर्श्य । ओं सां इत्यादि षडङ्गन्यासं कृत्वा। सर्वत्रपालिकानां विष्णुवादिमूर्तिं आवाह्य। अभ्यर्च्य । अर्घ्यादिभिः सम्पूज्य। पायसान्नंनिवेद्य। नीराज्य।

स्तण्डिले विधिवदग्निं सम्पाद्य। तन्मध्ये आधारादि पद्मान्तं हुत्वा।
ओं सों सोमाय नमः आगच्छ इत्यावाह्य। अर्घ्यादिभिः हुत्वा। समिदाज्य चरुणा यथाशक्ति सोममन्त्रेण हुत्वा। सम्पादाज्यं सङ्गृह्य। धान्यादि देवतानामुद्धिश्य तत्तन्मन्त्रेण हुत्वा। पुरुष सूक्तेन चरुणा षोडशाहुतीः हुत्वा। पालिकासु ओं मूर्धानं इतिमन्त्रेण मृत्स्ना वालुकां च गोकरीष चूर्णेन सह पूरयित्वा। आम्र पल्लवादीन् बध्वा। धान्यानि च सम्पूर्य । सम्पादाज्येन ओं धं नमः पराय स्पर्श तन्मात्रात्मने नमः इति कूर्चेन स्पर्शयित्वा । स्विष्टकृद्धवनं कृत्वा । पंचोपनिषन्मन्त्रेण शान्तिहोमं कृत्वा। पूर्णाहुतिं कृत्वा । सोममन्त्रं यथाशक्ति जपित्वा । अग्निमुद्वास्य । याग शालायां ऐशान्य दिग्भागे धान्य पीठे सोमकुम्भादीनि सम्स्थाप्य. नीराज्य।

## रक्षाबन्धन विधिः

शुभे शोभने मुहूर्ते आचार्यः धान्य पीठे सप्त पंच तन्तुणा निर्मित सूत्राणि सुवर्ण रजत सूत्राणि च गृहीत्वा । ताम्बूल क्रमुखानि फलानि च गुळापूपेन सहितं प्रादक्षिण्येन गर्भ गेहं प्रविश्य । पुण्याह जलेन प्रोक्ष्य । अपराजित मन्त्रं जपित्व ।

## अपराजित मन्त्रः

अस्य श्री अपराजित महा मन्त्रस्य। प्रद्युम्न ऋषिः। अदितीश्छंदः । श्री विश्व रूपि नारायणो देवता । अं बीजं । उं शक्तिः । मं कीलकं । भगवत्प्रतिसराभिमन्त्रणार्थे जपे विनियोगः ।

ओं नमो भगवते अनन्ताय सहस्त्रशीर्षाय सुगन्धि क्षीरोदार्णव शायिणे नागभोग पर्यङ्काय गरुडवाहनाय वासुदेवाय नमः।

पीतवाससे सङ्कर्षण प्रद्युम्न अनिरुद्ध हयशीर्ष वराहनारसिम्ह वामन त्रिविक्रम राम राम राम कृष्णः कल्कि परंबृह्म नमोस्तुते।

असुर दैत्य यक्ष राक्षस भूत प्रेत पिशाचाऽपस्मार सिद्ध योगिनी शाकिनी डाकिनी बृह्मराक्षस विनायक पूतना रेवतीस्कन्द पुरोगण नवग्रहादि नक्षत्र ग्रहान् अन्यांश्च महाग्रहान् हण हण पतीन्पतीभ्यः।

अख्यातुमाख्यातुं गृहाण गृहाण आविश आविश ध्वंसय ध्वंसय. त्रासय त्रासय द्रुह्य द्रुह्य चक्रेण गदा वज्रेण भस्मी कुरु भस्मीकुरु स्वाहा।

चक्र गदा वज्र सहस्त्रार मुख्य सर्व प्रहरणायुध बाहो जयजय विजय विजय अनन्तापराजित अप्रतिहत सहस्त्र नेत्र प्रज्वल प्रज्वल ज्वलज्वल विश्वरूप मधुसूदन महापुरुष वैकुण्ठ नारायण पद्मनाभ हृषीकेश सर्वभूत वशंकर शङ्ख चक्र गदाधर सर्वभूत नमस्कृत सर्वनाग प्रमर्धन सर्वासुरोत्साधन सर्व देव नमस्कृत सर्वग्रह निवारण सर्व यन्त्र प्रभंजन सर्वदुःख प्रशमन सर्वज्वर विनाशन सर्व भूतापकर्षण सर्व दुस्वप्न नाशन सर्वभक्त प्रदायक जनार्दन नमोस्तुते।

इति मन्त्र जपादनन्तरं भगवतः श्रीवत्सात् सूत्रेषु श्रियमावाह्य । श्रीसूक्तेन पूर्ववत् षोडशोपचारान् सम्पूज्य नीराज्य । ओं सहस्त्रारहुम्फट् इति सप्तवारमभिमन्त्र्य ।

भगवन्तं अर्घ्यादिभिः सम्पूज्य।

भगवन् पुण्डरीकाक्ष करिष्ये कौतुक क्रियां।
महोत्सवार्थं देवेश तदर्थं त्वं म्प्सीद ओं।

इति प्रार्थ्य । अस्य देवदेवस्य .... रक्षा बन्धन कर्म करिष्ये इति सभ्यनुज्ञां कुर्यात्। ओं विश्वेत्ताते सवनषु प्रवाच्यया याचकर्थ मघवन्निंद्र सुन्वते पारावतं यत्पुरुसंभृतं वश्वपावृणोच्छरभाय ऋषि बन्धवे। इति भगवद्धक्षिण हस्ते देव्याः वाम हस्तेच बद्धा।

ओं बृहत्सामक्षत्रभृद्धद्ध वृष्णियं तृष्टुभोजश्शुभित मुग्र वीरं
इंद्रस्तोमेन पंच दशेण मध्यमितम्वातेन सगरेणरक्ष।

इति धूपेन रक्षां कृत्वा। गुळापूपं निवेद्य। नीराज्य। आचार्यादीनां च बध्वा। दक्षिणानि दत्वा। गरुडप्रतिष्ठां कारयेत्।

*****************

## श्री गरुड प्रतिष्ठा विधिः

सर्वाऽलंकार भूषितः आचार्यः सर्वलक्षणेन ध्वजपटं गरुडं शिल्पिना लिखित्वा। ओं इति गृहीत्वा। सकल वेदवाद्य घोषैः सह मन्दिरं प्रादक्षिण्येन प्रतिष्ठा मण्डपं नीत्वा। पुण्याह जलेन सर्वत्र प्रोक्ष्य। भगवतः पुरतः स्थाप्य। इमां गाथामुदीरयेत्।

भगवन् पुण्डरीकाक्ष सर्वेश्वर जगन्मय।
त्वया यथा तु कथितं तथा कर्तुं न शक्यते।
अस्वातन्त्र्यादसामर्थ्यात् श्रद्धादीनां अभावतः
तस्मात् मामात्मसात्कर्तुं न्यूनाधिख्योप शान्तये।
समालोकय नेत्राभ्यां शीतळाभ्यां पटस्थितं।
सर्वदोषाऽपहारिभ्यां वैनतेयं प्रसीदय।

इति भगवन्तं प्रार्थ्य। भगवत्प्रतिष्ठावत् सर्वकार्याणि निर्वृत्य ।

१. धान्याधिवासनार्थं शालि पीठे संस्थाप्य।

२. छायाधि वासनाङ्गं रक्षा बन्धनं कृत्वा। सूत्रे वासुकीं आवाह्य।

३. जलाधि वासनार्थं कटाहे गन्ध जलेनसम्पूर्य। सम्हार क्रमेण कूर्चं निक्षिप्य। न्यासं कृत्वा।

**************************

## गरुड न्यास विषये विशेषः

कूर्मासने उपविश्य। भूतशुद्ध्यादि मानसयागान्तं अष्टाक्षरेण विधिवत् कृत्वा। अनन्तरं अस्य श्री गरुड पंचाक्षरी महामन्त्रस्य।

काश्यप ऋषिः। पङ्क्तिश्छन्दः। श्री गरुडोदेवता। क्षींबीजं। स्वाहा शक्तिः। पं कीलकं। श्री गरुड प्रसादसिध्यर्थे जपे विनियोगः।

ओं क्षीं अङ्गुष्ठाभ्यां नमः। ओं पं तर्जनीभ्यां स्वाहा।

ओं ओं मध्यमाभ्यां वषट्। ओं स्वां अनामिकाभ्यां हुं।

ओं हां कनिष्टिकाभ्यां फट्। क्षिप ओं स्वाहा नखमुखैर्वौषट्।

अथ देह न्यासः।

ओं ज्वल ज्वल महामते स्वाहा ओं क्षां हृदयाय नमः।

ओं गरुड चूडानने स्वाहा ओं क्षीं शिरसे स्वाहा।

ओं गरुड शिखायै वषट् ओं क्षूं शिखायै वषट्;।

ओं गरुडप्रभंजय प्रभंजय प्रभेदय प्रभेदय वित्रासय वित्रासय विमर्दय विमर्दय स्वाहा ओं क्षैं कवचाय हुं।

ओं उग्ररूपधर सर्व सर्प भयंकर सर्व विषं दारय दारय भीषय भीषय दह दह भस्मीकुरु भस्मीकुरु स्वाहा ओं क्षौं नेत्राभ्यांवौषट्;।

ओं अप्रतिहत शासनाय ओं नमस्सुदर्शनाय हुंफट् स्वाहा ओं क्षः अस्त्रायफट्। इति षडङ्गन्यासं कृत्वा।

## श्री गरुड ध्यानं

आजानुत सुवर्णाभं आनाभेः तुहिनप्रभम्।
कुङ्कुमारुण माकण्ठात् आकेशान्तासितेतरम्।
स्वस्तिकं दक्षिणंपादं वाम पादं तु कुञ्चितम्. ।
कपिलाक्षं गरुत्मन्तं सुवर्णसदृशप्रभम्।
दीर्घ बाहुं बृहत्स्कन्धं नागाभरणभूषितम्।
नीलाग्र नासिकात्मानं महापक्षं स्मरेत्बुधः।
दंष्ट्रा कराळ वदनं किरीट मकुटोज्ज्वलम्।
सर्वाभरण सम्युक्तं सर्वावयव सुन्दरम्।
अनन्तो वाम कटकः यज्ञसूत्रंतु वासुकिः।
तक्षकः कटिसूत्रंतु हारः कार्कोटकःतथा।
पद्मो दक्षिण कर्णे तु महापद्मस्तु वामतः।
शङ्कःशिरः प्रदेशेतु गुळिकस्तु भुजान्तरे।
एवं ध्यायेत् त्रिसंध्यायां आत्मानं गरुडाकृतिम्।
विषं नाशयते क्षिप्रं अग्निं क्षिप्तमिवांभसि।
ओं नमः पक्षिराजाय वेदपक्षयुग प्रभो।
वैनतेय नमस्तेस्तु श्री गरुडाय नमो नमः।

एवं ध्यात्वा । मानसाराधनादि सर्वोपचारान् कृत्वा । पुरतः धान्य पीठे दशकलशान् संस्थाप्य । सर्वत्र आधारादि पद्मान्तं अभ्यर्च्य । महाकुम्भे ओं क्षं वैनतेयाय नमः इत्यावाह्य । उप कुंभेषु इन्द्रादीनावाह्य । करके सुदर्शनमावाह्य । सर्वत्र पूर्ववत् आवाहनादि षण्मुद्रा सहितं षडङ्गन्यासं कृत्वा । अर्घ्यादिभिः अभ्यर्च्य। निवेदनपूर्वकं नीराज्य ।

**नयनोन्मीलनार्थं** संकल्प्य । धान्यपीठे द्वौ सुवर्ण रजत पात्रे निधाय । पूर्व पश्चिमतः स्थाप्य । मधुना घृतेन च पूरयित्वा । सुवर्ण रजत शलाकीकां च अष्ट धान्यानि च स्थापयित्वा । सर्वत्र पुण्याह जलेन प्रोक्ष्य । शोषणादीनि कृत्वा । मधुपात्रे ओं हं

सूर्याय नमः। आज्यपात्रे ओं वं चन्द्रमसे नमः इत्यावाह्यऽभ्यर्च्य। ओं मधुवाता इति मन्त्रेण मधुपात्र मभिमन्त्र्य।

ओं सविराजन्परियेत् प्रजानन् प्रजांपुष्टिं वर्धमानोऽस्मै । इति आज्य पात्रमभिमन्त्र्य।

स वेद वाद्यघोषैः सह दक्षिण नेत्रं सुवर्ण शलाकया " **चित्रंदेवानामुदकातनीकं** " इति मन्त्रेण मधुना उन्मील्य।

राजतशलाकया " **तच्चक्षुर्देवहितं** " इति मन्त्रेण आज्येन वाम नेत्रमुन्मील्य। अष्ट नागानामपि एवं कृत्वा। तिरस्करिणीं व्यपोह्य। अष्टधान्यानि दर्पणानि च संदर्शयित्वा। नीराज्य।

छायास्नपनार्थं षोडश कलशान् स्थाप्य। पुरुष सूक्तेन अभिमन्त्र्य। प्रोक्षण मार्गेण अभिषिच्य। विधिवदग्निं प्रतिष्ठाप्य। तन्मध्ये आधारादि पद्मान्तं हुत्वा। ओं क्षं वैनतेयाय नमः आगच्छाऽऽगच्छ इति आवाह्य। अर्घ्यादि नैवेद्यान्तं हुत्वा समिदाज्य चरुभिः हुत्वा। चरुणा नृसूक्तेन हुत्वा। शान्ति होम सहितं पूर्णाहु तिं कृत्वा।

<u>पटस्थं गरुडं इमांगाथां प्रार्थ्य</u>

ओं महाबल महाबाहो वैनतेय वयोधिप।
सन्निधत्स्व पटे तुभ्यं नमः प्रणव मूर्तये।
कर्मणां सिद्धिमाहूतः कुरुष्व विहगेश्वर।
आहूतव्याः त्रयोलोकाः देवस्योत्सवसंपदि।

इति पटस्तं गरुडं ध्यात्वा ।

<u>कुम्भस्थं गरुड प्रार्थना</u>

वाहनाय महाविष्णोः ताक्ष्यायाऽमित तेजसे।
गरुडाय नमस्तुभ्यं सर्व सर्पेन्द्रमृत्यवे।
नमो नमस्ते पक्षीन्द्र स्वाध्याय वपुषे नमः।
विहगेन्द्र नमस्तेस्तु समुत्पाटित कल्पक।

आहृताऽमृत कुम्भाय जननी दास्यमोचने।
सुरासुरेन्द्र जयिने नागेन्द्राऽऽभरणायते।
यदाधारमिदं सर्वं तदाधारायते नमः।
पक्षौ यस्य बृहत्साम रथन्तरमपि द्वयं।
अक्षिणीचापि गायत्रि त्रिवृत्साम शिरस्मृतं।
स्तोम आत्मा नमस्तस्मै वामदेव्याङ्ग सम्पदे।
नमः प्राणादि वायूनामीशानाय गरुत्मते।
दोषान् अपनया अखण्डान् गुणान् आवह सर्वतः।
विघ्नानि जहि सर्वाणि आत्मसात्कुरुमामपि।

एवं स्तुत्वा। गरुड मूल मन्त्रं यथा शक्ति जपित्वा। चतुर्विधं अन्नं निवेद्य। नीराज्य। जागरेण नयेन्निशां।

*********************************

## ध्वजारोहण विधिः

प्रभाते आचार्यः नित्यकर्मा निर्वृत्य । पूर्वे स्थापित पालिकादीनां पूजयित्वा । श्री भूदेव्याः सहितं देवं ध्वज पटेन वेद वाद्य घोषैःसह ध्वजारोहणार्थं ध्वज स्तम्भ समीपं गत्वा। ध्वजस्तम्भादीनां पुण्याह जलेन प्रोक्ष्य। गरुडकुम्भान् सर्वमपि धान्यपीठे ध्वजस्तम्भ समीपे संस्थाप्य। पुनः सर्वत्र अर्घ्यादिभिःसम्पूज्य। पुरुष सूक्त मुच्चरन् कलश तीर्थेन पटस्थं गरुडं संप्रोक्ष्य। उपकुम्भजलेन अष्टनागानामपि प्रोक्ष्य। मध्य कुम्भस्थंगरुडं ध्वज पटे आवाह्य। सकूर्च माल्यादीनि अलङ्कृत्य। गुळान्नं निवेध्य। नीराज्य। पूर्वे प्रार्थित वैनतेय ध्यानेन गरुडताळं पठित्वा।

<u>गरुड ताळ विधिः उच्यते</u>

ओं गरुड वाहन परशु धारण चक्र पाश धरम्।
स्फटिक सन्निभ मकर कुण्डल कनक मकुट धरम्।
विहग परिभृड महि विभूषणमसुर वैरि रथम्।
अळिकुलाळक कुटिल कोमळ मनिल तुल्यगतिम्।
भृकुटि भीषण करतलालक कनक लोचनकम्।
कनक कल्पित खचित रत्न मकुट कोटिधरम्।
सकल पशुपति हरित हरहरि सर्प संहरणम्।

अनन्त कटकं वासुखि सूत्रं तक्षकः कटि बन्धनम्। हारसु कार्कोटकं। पद्मं दक्षिण कर्णस्थं । वामे कर्णे महापद्मं शङ्ख फणामणि रत्न मरीचि विराजित शेकर गुळिक भुजं। कमल भव वन्दितं स्कन्द बृन्दोपमं। कनकमयकुण्डलं। कंज पुञ्जाननं। कर चरणकिङ्किणी कंबुकोरंबरं शिख चरित मन्दिरं। चित्तमम्बोजितं। अम्बोजलधि कारणं। मङ्गळं; पङ्कजं तेजुपति संहारत्यंजनत्यम्भुजे। झण झण झङ्कृत किङ्किणि हण हण हंकृत हूंकरणं। विनतातनुजं कनकाद्रि निभं। बुजङ्गकुल भीषणं विहङ्गकुल भूषणं। बृहत्पक्षविपक्षं। गरुत्मन्तं नमस्येहम्।

हरि वाहनं हरि वाहनं हरिकेतनं हरि केतनं । बन्धय बन्धय प्रकट प्रकट । प्रमथन प्रमथनग्रहबुग्ग्रहबुग् संग्रह सङ्ग्रह । चन्चद्धिंजुर चुंचु विधारित पुंजत्सिजत्फ़णिराविकं । कणिका कपर्टिं । रिङ्गश्लेष फणामणि किङ्किणि मंजुळ कंजुकर तों तोम् । करणोरुह भीषण नादकरं । श्रीमद्गरुडं गरुडं वरदंवरदं विद्युत् प्रभं । भक्तप्रियं । मुखोन्नत नासोन्नतं । सव्य वाहनमुख्यं मुख्यं नीलांबरधरं । नागाभरणं । मणिघण रुचिर क्रीडाहरणं । पाद नूपुर किङ्किणिघोषं । सामगायति पक्ष युग्मं वेद वेद्यतनुविहरति पक्षं । सकल शत्रु भीषण पक्ष युगळं । शत्रु वास्याननं । बृह्मादि वन्दितं स्कन्द वहचक्रिणं । सकल देव लोकानन्दं । सकल सृष्टि पतिं संहार कारणं । कमलसदृशाननं । झल झलन किङ्किणी झर्झटं धों धों । तत्तत्।

झल झलन किङ्किणी झर्झटं धों धोम् ।

पक्षीशस्यगरुडताळं। मध्यमस्वरं। गौळरागं। विष्णुक्रान्तनृत्तं। इति वेद वाद्य घोषैः सह गरुडं पूजयित्वा। सुमुहूर्ते आचार्यः अस्य देव देवस्य .....स्वामि सन्निधौ राज राष्ट्राभिवृघ्यर्थं ....मास नवदिन महोत्सवाङ्गं ध्वजारोहण मुहूर्तस्सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु। इति प्रार्थनापूर्वकं

**ओं सुपर्णोसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा सामते तनूः । वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञा यज्ञियं पुच्छं छन्धागुश्शफा यजूगुंसि नामा। सुपर्णोसि गरुत्मान् दिवंगच्छ सुवः पथा।**

इति वेद वाद्य घोषैः सह ध्वजमारोप्य । त्रिः कबळ प्रसादेन गरुडाय निवेद्य । पुत्रसंतानप्राप्तुमिच्छ जनानां दद्यात् । वन्ध्या दोषनिवृत्तिं कुर्यात्

तदनन्तरं इमां गाथेन गरुडं प्राथ्र्य ।

**ओं पक्षीन्द्र पक्ष विक्षेप तरङ्गाऽनिल सम्पद।**
**निरस्तासुर सन्नाह समरे शत्रु सूदन।**
**सन्निधत्स्व पटे यावदुत्सवाऽवभृतान्तिमं।**

इत्युच्छार्य। भगदभिमुखो वीक्ष्य।

**अस्मद्दिनात्समारभ्य यावत्तीर्थ दिनान्तिमम्।**
**सन्निधिं कुरु पक्षीन्द्र राज्ञो जनपदस्य च।**
**ग्रामस्य यजमानस्य वैष्णवानां विशेषतः।**
**तुष्टयेपुष्ट्ये चैव सर्व शत्रुक्षयाय च।**
**अपमृत्यु जयार्थाय वैनतेय प्रसीद ओं।** इत्युक्त्वा ।

*************************************

## अष्ट दिग्बन्धनं

तद्विवरणमाह। आचार्यः पवित्र पाणिः प्राणानायम्य। अस्य देवदेवस्य....सन्निधौ महोत्सव ध्वजारोहण काले सकल देवता तृप्त्यर्थं दिग्बन्धन पूजां करिष्ये। इति सङ्कल्प्य।

### 1. इन्द्र :

**पूर्वे इन्द्र दिग्भागे आसनं अक्षतया समर्प्य**

दम्भोळि भीषण भुजाय सुराधिपाय
श्यामाय दानवकुलक्षय कारणाय।
पूर्वाधिपाय सुर वारण वाहनाय-
तुभ्यं पुलोमतनया पतये नमोऽस्तु।

इन्द्रस्य मेघताळं। कल्याणि रागं। बुजङ्गनृत्तं। (त्रातारमिन्द्रं)

दिमितदितिसुतयुवतिकुचतटघटितकुङ्कुमहारिणं।
समत घणमख जवन निजगज गमन लोलुप मानसं।
वितत सुरतरु बहुळ परिमळकुसुम दाम विराजितं।
नमत शतमख मनसमभिनव नील नीरद् मेचकं। तत्तत्।

प्राच्यांदिशी ऐरावतारूडः वज्रायुध धरः स शक्ति परिवारो दिग्देवताधिपति सहितः इन्द्रादि साग्नेयान्तं मण्डलं बन्धयतु। चोरारि व्याघ्र वराह सर्प यक्ष राक्षस भूत प्रेत पिशाचापस्मार शाकिनी ढाकिनी वेताळ ब्रह्म राक्षसादि सर्व दुष्ठ ग्रहान् बन्ध बन्ध मां रक्ष रक्षअचल अचल आक्रम्याऽऽक्रम्य महावज्र कवचाय हुंफट् स्वाहा। इति प्रसादेन सोदकं बलिं दध्यात्।

### 2 अग्नि :

अग्ने तु हव्यमनिशं वहते सुरानां
कव्यं समीप मथवा नयते पितृणाम्
धूमध्वजाय दहनाय जुहूदराय
स्वाहा स्वधा प्रिय कृते हविषे नमोस्तु।

अग्नेर्बद्धाव ताळं। गौळ रागं। सर्वतोभद्र नृत्तं। (आयाश्चाग्ने)

अग्नि ममुज्वलित प्रभ मूर्जित जित्प्रभ देश गतिम्
झल्लि मुरारि धृडक्रम शक्ति सुजीवित कृत्म गतिम् ।
यज्ञ हुताशन दाहन दुरितं क्रममय दिति तौघं।
वाहन मेषं वरदहनप्रिय सन्ततदास हितं।
साह जितागत चंद्रक भूषण शक्तिसदासहितं।
दाहन मोहन हुंकृति सेवित दान दयावरदं।
निखिल कृत गुणनिगमस्तोम विनोदक विश्व जनं।
काहळ शङ्ख समद्धळ पटह हरिद्रक ताळमिदं। तत्तत्।

आग्नेयां दिशि मेष वाहनारूडःस्त्रुक्स्त्रुव धरःग्निः सवाहनायुध शक्ति परिवाराधिपति सहितः आग्नेयादि दक्षिणान्तं मण्डलं बन्धयतु।
चोरारि व्याघ्र वराह सर्प यक्ष राक्षस भूत प्रेत पिशाचापस्मार शाकिनी ढाकिनी वेताळ ब्रह्म राक्षसादि सर्व दुष्ट ग्रहान् बन्ध बन्ध मां रक्ष रक्ष अचल अचल आक्रम्याऽऽक्रम्य महावज्र कवचाय हुंफट् स्वाहा। इति प्रसादेन सोदकंबलिं दध्यात्।

**३ यमः**

कालाय कंजनयनाय चतुर्भुजाय
नील प्रभाय महिषाधिप वाहनाय।
दण्डायुधाय तनयाय विकर्तनाय।
देवाय दक्षिणदिशा पतये नमोस्तु।

यमस्य भृङ्गिणी ताळं। काम्भोजि रागं। कुट्टिमनृत्तं। (यदुलूको)

प्रणमत शमणं प्रणमत शमणं करदृत वरदण्डं।
त्रिभुवन हरिणं वाहन महिषा प्रघटित महिमानं।
काल सुवर्ण कराळ तटाकृति कङ्कणभूषणकं।
अगणित विभवं परिजन सहितं कलशज ककुबीशं। तत्तत्।

दक्षिणस्यां दिशी कालः महिष समारूडः पाश दण्ड हस्तः सवाहनाऽऽयुध शक्तिः

परिवारो दिग्देवताधिप सहितः याम्यादि नैऋत्यान्तं मण्डलं बन्धयतु।
चोरारि व्याग्र वराह सर्प यक्ष राक्षस भूत प्रेत पिशाचापस्मार शाकिनीढाकिनी वेताळ ब्रह्म राक्षसादि सर्व दुष्ट ग्रहान्बन्ध बन्ध मां रक्ष रक्ष अचल अचल आक्रम्याऽऽक्रम्य महावज्र कवचाय हुंफड्वाहा। इति प्रसादेन सोदकं बलिं दध्यात्।

### ४ नैऋतिः

श्यामाय भीषण हयाधिप वाहनाय।
कोणाधिपाय लसदुग्र कृपाणकाय।
तुभ्यं पिशाच कुल राक्षसयातुधान
सेनावन प्रिय कृते निऋते नमोस्तु।

नैऋतेर्मल्ल ताळं। देशाक्षि रागं। कमलबन्ध नृत्तम्(असुन्वन्त)

सप्त घण वृद्ध गण दुर्जत विमर्धकर चित्र करणप्रहसितेता।
मद्धळ मुखप्रहितशब्द निहितक्षण पुरस्सरसुराऽसुर सुवीर।
सत्य रसभक्त जन रक्षण समर्थ हरित प्रचुर सत्यविद्धेतः।
विघ्नकर शत्रुजन मत्तकर चित्रकरण प्रहसितक्षणमुपेतः। तत्तत्।

नैऋत्यां दिशी हय वाहनारूडःखड्ग केटाङ्ग हस्तः सवाहन शक्तिःपरिवार देवता सहितः नैऋत्यादि पश्चिमान्तं मण्डलं बन्धयतु। चोरारि व्याग्र वराह सर्प यक्ष राक्षस भूत प्रेत पिशाचापस्मार शाकिनी ढाकिनी वेताळ ब्रह्म राक्षसादिसर्व दुष्ट ग्रहान् बन्ध बन्ध मांरक्ष रक्ष अचल अचल आक्रम्या ऽऽक्रम्य महावज्र कवचाय हुंफट् स्वाहा। इति प्रसादेन सोदकं बलिं दध्यात्।

### ५ वरुणः

श्यामळाय मकराधिरोहिणे तुभ्यमुल्लसित पाशपाणये।
जीवनाय वरुणाय कुर्महे देहिनामपरदिक्पतये नमोस्तु ॥

वरुणस्य मङ्गळ ताळं। नाट्ट रागं। कमलनृत्तम्। (इमम्मे )

शतमखकुलिशं क्षितिभृतद्दडिमतप्रणमतसुरवरनिकुरम्भं।
मकर प्रवर प्रकरसि सुर सृड्मकुटप्रकटित नवरत्नं।

धमधम परिवृत परिवृत शरमणि मृदुज्वल जलनिधि मुदितान्तं।

उदनिधि सदनोनिवसतु निरतं विददतु वरुणोममभूतं। तत्तत्।

पश्चिमायां दिशी मकर वाहनारूडः पाश हस्तः वरुणः

सवाहनायुधशक्ति परिवार दिग्देवताधिप सहितः पश्चिमादि वाय्वान्तं मण्डलं बन्धयतु। चोरारि व्याग्र वराह सर्प यक्ष राक्षस भूतप्रेत पिशाचापस्मार शाकिनी ढाकिनी वेताळ ब्रह्म राक्षसादि सर्व दुष्टग्रहान् बन्धबन्ध मां रक्ष रक्ष अचल अचल आक्रम्याऽऽक्रम्य महावज्रकवचाय हुंफट् स्वाहा। इति प्रसादेन सोदकं बलिं दध्यात्।

## ६ वायु :

प्राणादि भेदकजुषे घृतकेतनाय

धूम्राय तुङ्ग मृगपुङ्गववाहनाय।

कोणाधिपाय जगतामधिपावनाय

वायो सदागतिमते भवते नमोस्तु।

वायोर्जय ताळं । श्री रागं। पृष्टकुट्टिमनृत्तम्। (आनोनुयुद्धिः)

सुर पुर तरुवर सुमनः परिमळ सुरभित विश्वगणं।

अविरत रतिपति रतियुत सुरवर युवती कृद्धनकं।

क्रीडाबेद् प्रशनः पटुतर सुरभवसरणियुतं।

पुरतःपुरतःपरितःपरितः परिटारूडयुतं। तत्तत्।

वायव्यां दिशी मृगवाहनारूडः ध्वज हस्तः वायुः सवाहन शक्ति परिवारोदिग्देवताधिप सहितः वायव्यादि सोमान्तं मण्डलं बन्धयतु। चोरारि व्याग्र वराह सर्प यक्ष राक्षस भूत प्रेत पिशाचापस्मार शाकिनी ढाकिनी वेताळ ब्रह्मराक्षसादि सर्व दुष्ट ग्रहान् बन्ध बन्ध मां रक्ष रक्ष अचल अचल आक्रम्याऽऽक्रम्य महावज्र कवचाय हुंफट् स्वाहा। इतिप्रसादेन सोदकं बलिं दध्यात्।

## ७ कुबेरः

सुवर्ण वर्णाय शिवप्रियाय धनधिनाथाय च गुह्यकाय।

उदग्दिगीशाय हराद्रिवासिने नमोस्तु तुभ्यं नरवाहनाय।

कुबेरस्य भद्र ताळं । मोहन रागं। मण्डलनृत्तम्। (राजाधिराजाय)

यक्ष घण रक्षण विचक्षण मुदारं शिक्षित विपक्ष मति यक्ष परिवारं।

त्र्यक्ष सख मिक्षु सुसुदृक्ष शुभ वाचं यक्ष पति यक्ष युग लक्ष्यमिह कुर्मः। तत्तत्।

उदीच्यांदिशि नरवाहनारूडः पद्महस्तः कुबेरः सवाहनायुधशक्ति परिवारः उदग्दिग्देवताऽधिप सहितः उदीच्यादि ईशानान्तं मण्डलं बन्धयतु। चोरारि व्याग्र वराह सर्प यक्ष राक्षस भूत प्रेत पिशाचापस्मार शाकिनी ढाकिनी वेताळ ब्रह्म राक्षसादि सर्व दुष्ट ग्रहान् बन्ध बन्ध मां रक्ष रक्ष अचल अचल आक्रम्याऽऽक्रम्य महावज्र कवचाय हुंफट् स्वाहा। इति प्रसादेन सोदकं बलिं दध्यात्।

## ८ ईशानः

वृषाधि रूढाय जटाय मौलिने। कपाल हस्ताय कलावतम्सिने।

त्रिशूलिने कोणदिशाधि वासिने। सदासुवासाय शिवाय ते नमः।

ईशानस्य डक्करी ताळं। शङ्कराभरण रागं। वामजानूर्ध्वनृत्तं। (तमीशानं)

त्रिलोचनं त्रिशूलिनं जटाधरं नटाधिपं
कपर्धिनं विमर्दिनं प्रभंज मोहकारणं।
पुरान्तकं जितान्तकं नतान्तरङ्गतोषकं
चिरन्तनं तपोधनैर्विचिन्त्यमान विग्रहं।
उमापतिं नमामितं कपालिनंकृपालयं
बुजङ्गराज भूषणं कुरङ्ग राजपोषणं
थणाकुधिं धिणाकृधिं धिणेकुधिं धिनेकृधिं
दगद्धग द्धिगिद्धिगिच्चिवस्य ताळमीदृशं। तत्तत्।

ऐशान्यां दिशी वृषभ वाहनारूडः शूल हस्तः रुद्रः सवाहनायुध शक्ति परिवार दिग्देवताधिपति सहितः ऐशान्यादि इन्द्रान्तं मण्डलं बन्धयतु।

चोरारि व्याग्र वराह सर्प यक्ष राक्षस भूत प्रेत पिशाचापस्मार शाकिनीढाकिनी वेताळ ब्रह्म राक्षसादि सर्व दुष्ट ग्रहान् बन्ध बन्ध मां रक्ष रक्ष अचल अचल आक्रम्याऽऽक्रम्य महावज्र कवचाय हुंफट् स्वाहा। इति प्रसादेन सोदकं बलिं दध्यात्।

महा बलिपीठे पूर्ववत् “मुखपंचसमवक्र .... बलिपीठदेवं”
इति समस्त देवतानां तृप्त्यर्थं सोदकम् बलिं ददामि इति समस्त वाद्यघोषैस्सह प्रसाद बलिंदत्वा। नीराज्य । भगवत्समीपं गत्वा ।

**ज्ञानतोऽज्ञानतो वापि यथोक्त मकृतम्मया ।**
**तत्सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा ।**
**ओं अच्युत जगन्नाथ मन्त्र मूर्ते सनाथन ।**
**रक्षमां पुण्डरीकाक्ष क्षमस्वाजः प्रसीद ओं।**

इति विज्ञाप्य । आचार्यासम्मानं कृत्व । वीथि ब्रमणं। भगवतः दृष्ठि दोष निवारणार्थं अर्घ्यादीनुपचार पूर्वकं घट दीपेन नीराज्य। पानक पानीय मुद्गदळादीनि निवेद्य। नीराज्य। कलश स्नपनं । महानिवेदनं च कृत्वा ।
सायाह्ने नित्यकर्माद्यनन्तरं। याग शालायां गत्वा। आचार्यः भगवन् महोत्सवार्थं चतुस्थानपूजांकरिष्ये। तदङ्ग द्वार तोरण ध्वज कुम्भ देवतापूजनं च करिष्ये इति सङ्कल्प्य।

****************************************

## द्वारपूजाविधिः

### १ पूर्व द्वारे

अश्वत्थ तोरणे ओं ऋग्रूपाय ओं सुशोभनाय नमः। ओं लं इंद्रायनमः।
पार्श्वस्थ रक्त ध्वजयोः ओं कुमुदाय नमः। ओं कुमुदाक्षाय नमः।
कुम्भयोः ओं पूर्णाय नमः। ओं पुष्कराय नमः। इत्यभ्यर्च्य। अर्घ्यादिभिः सम्पूज्य। ओं अग्निमीळे पुरोहितं .....रत्न धातमम्। इतिपठित्वा। फलवर्ग तांबूलादीनि निवेद्य। नीराज्य।

### २ दक्षिण द्वारे

औदुंबर तोरणे ओं यजुरूपाय ओं सुभद्राय नमः। ओं हं यमायनमः।
पार्श्वस्थ पीत ध्वजयोः ओं पुण्डरीकाय नमः। ओं वामनाय नमः।

कुम्भयोः। ओं आनन्दाय नमः। ओं नन्दनाय नमः। इत्यभ्यर्च्य। ओं इषेत्वोर्जेत्वा....श्रेष्ठ तमाय कर्मणे। इति पठित्वा। फलवर्ग तांबूलादीनि निवेद्य। नीराज्य।

## ३ पश्चिमद्वारे

न्यग्रोध तोरणे ओं साम वेद रूपाय ओं वं वरुणाय नमः।

पार्श्वस्थ नील ध्वजयोः ओं शङ्कुकर्णाय नमः। ओं सर्व नेत्राय नमः।

कुम्भयोः ओं वीरसेनाय नमः। ओं सुषेणाय नमः। इत्यभ्यर्च्य।

ओं अग्न आयाही .... सत्सि भर्हिषि इति पठित्वा। फलवर्ग तांबूलादीनि निवेद्य। नीराज्य।

## ४ उत्तरद्वारे

प्लक्ष तोरणे ओं अथर्व रूपाय ओं सोमाय नमः। पार्श्वस्थ शुक्लध्वजयोः। ओं सुमुखाय नमः। ओं सुप्रतिष्ठाय नमः। कुम्भयोः ओं सम्भवाय नमः ओं प्रभवाय नमः। इत्यभ्यर्च्य।

ओं शन्नोदेवीः ... अवन्तुनः। इत्यभ्यर्च्य। फलवर्ग तांबूलादीनि निवेद्य। नीराज्य। सम्पूज्य।

पालिकादीनां च सम्पूज्य हरिद्राजलसेचन, सोमकुम्भ प्रोक्षणानि कृत्वा। फलवर्ग तांबूलादीनि निवेद्य। नीराज्य। इति द्वार पूजा विधिः।

## महाकुम्भादि उप कुम्भ पूजने विशेषः

मध्य वेदिकायाम् धान्य पीठे दश कलशान् संस्थाप्य। गन्धोदकेनापूर्य। एलालवङ्गादीन्निक्षिप्य। शोषणादीनि कृत्वा। सवस्त्र आम्रपल्लवानि समप्र्य। षड्विंशद्धर्भकृत कूर्चं निक्षिप्य। उप कुम्भादीनां च पूर्ववदलङ्कृत्य। सप्त दर्भकृत कूर्चं निक्षिप्य। वेदिकायाम्

ओं भू लोकाय नमः। ओं भुवर्लोकाय नमः।

ओं सुवर्लोकाय नमः। ओं महर्लोकाय नमः।

ओं जनोलोकाय नमः। ओं तपोलोकाय नमः।

ओं सत्य लोकाय नमः।  इत्यावाह्यऽभ्यर्च्य।

दर्भ मालायां ओं वासुक्यै नमः।  मण्डपस्य उपरि  ओं चक्रायनमः।
भूमौ  ओं पद्माय नमः।  विताने  ओं सोमाय नमः।  इत्यावाह्यऽभ्यर्च्य
महाकुम्भदिषु योग पीठार्चनं कृत्वा।  मध्यकुम्भे मूलभेरात् किञ्चिदावाह्य।
पूर्वादिषु चतुष्कुम्भे ओं वासुदेवाय नमः।  ओं सङ्कर्षणाय नमः।  ओं प्रद्युम्नाय नमः।
ओं अनिरुद्धाय नमः।  इत्यावाह्य।  अभ्यर्च्य।

आग्नेयादि कोणेषु  ओं पुरुषायनमः।  ओं सत्याय नमः ।
ओं अच्युताय नमः।  ओं अनन्ताय नमः।
करके ओं सुदर्शनाय नमः।  इत्यावाह्यऽभ्यर्च्य।  सर्वत्र आवाहनादि षण्मुद्रां प्रदर्श्य ।  तीर्थाऽवसानिकं प्राथ्य ।  मध्य कुम्भस्य नाभ्यादिहृदयान्तं द्वादशाक्षरेण न्यासं कृत्वा ।  उपकुम्भादीनां सर्वत्र अष्टाक्षरेण न्यासं कुर्यात्।

करके ओं आचक्राय स्वाहेति न्यासं कारयेत्।  अष्ट मङ्गलाधि दैवताय
ओं श्रीवत्साय नमः।  ओं पूर्णकुम्भाय नमः।  ओं भेर्यै नमः।
ओं दर्पण मण्डलाय नमः ओं मत्स्य युग्माय नमः।  ओं शङ्खाय नमः।
ओं चक्राय नमः।  ओं गरुडायनमः।

इत्यावाह्य ।  अभ्यर्च्य ।  सर्वत्र विसर्जनरहित षोडशोपचार पूजां कृत्वा । चतुर्विधमन्नं निवेध्य ।  नीराज्य ।

************************

## हवनविधौ विशेषः

यागशालायां चतुष्कुण्ड विधानंचेत् विधिवदग्निं प्रतिष्ठाप्य।  आधारादि पद्मान्तं हुत्वा। चतुष्कुण्डविधाने पूर्वादिषु कुण्डेषु वासुदेवादिमूर्तिमावाह्य।  एक कुण्ड पक्षे मूलमूर्तिमावाह्य।  तस्मिन्नेव

**स्वामिन् सर्वजगन्नाथ यावत्तीर्थाऽवसानकम्।**
**तावत्त्वं भक्ति भावेन वह्नौ त्वं सन्निधिं कुरु।**

इति प्रार्थ्य । अर्घ्यादि नैवेद्यान्तं विधिवत् हुत्वा। हवन द्रव्य विषये मूल मन्त्रेण व्रीहि, वेणु तिल, लाज, पुष्प, अगरु, घृत, समिद्भिः अष्ठोत्तर शताहुति वा अष्ठाविम्शति र्वा हुत्वा। पुरुष सूक्त हवनादनन्तरं, परिवार होमं करिष्ये इति संकल्प्य॥ परिषेचनं कृत्वा।

ओं ब्रह्मणे सपरिवाराय स्वाहा।

ओं प्रजापतये सपरिवाराय स्वाहा।

ओं रुद्राय सपरिवाराय स्वाहा। (अप उपस्पृश्य)

ओं सर्वेभ्यो देवेभ्यः सपरिवारेभ्य स्वाहा।

ओं छन्दोभ्यः सपरिवारेभ्यः स्वाहा

ओं वेदेभ्यः सपरिवारेभ्यः स्वाहा।

ओं ऋषिभ्यः सपरिवारेभ्यः स्वाहा।

ओं गन्धर्वेभ्यः सपरिवारेभ्यः स्वाहा।

ओं सरीसृपेभ्यः सपरिवारेभ्यः स्वाहा।

ओं यक्षेभ्यः सपरिवारेभ्यःस्वाहा।

ओं अप्सरेभ्यः सपरिवारेभ्यः स्वाहा।

ओं मासेभ्यः सपरिवारेभ्यः स्वाहा।

ओं वत्सरेभ्यः सपरिवारेभ्यः स्वाहा।

ओं सर्वेभ्यो देवीभ्यः सपरिवारेभ्यः स्वाहा।

ओं समुद्रेभ्यः सपरिवारेभ्यः स्वाहा।

ओं पर्वतेभ्यः सपरिवारेभ्यः स्वाहा।

ओं आपगेभ्यः सपरिवारेभ्यः स्वाहा।

ओं भूतेभ्यः सपरिवारेभ्यः स्वाहा।

ओं पशुभ्यः सपरिवारेभ्यः स्वाहा।

ओं वृक्षेभ्यः सपरिवारेभ्यः स्वाहा।

ओं ओषदीभ्यः सपरिवारेभ्यः स्वाहा।

ओं वनस्पतीभ्यः सपरिवारेभ्यः स्वाहा।

ओं उद्बीजेभ्यः सपरिवारेभ्यः स्वाहा।

ओं स्वेदजेभ्यः सपरिवारेभ्यः स्वाहा।

ओं अण्डजेभ्यः सपरिवारेभ्यः स्वाहा।

ओं जरायुजेभ्यः सपरिवारेभ्यःस्वाहा।

ओं भूरादि सप्तलोकेभ्यः सपरिवारेभ्यःस्वाहा।

ओं अतलादि सप्त पातालेभ्यः सपरिवारेभ्यः स्वाहा।

ओं चण्डादि द्वारपालेभ्यः सपरिवारेभ्यःस्वाहा। (29) इति हुत्वा।

अन्यत्र पूर्ववत् कृत्वा । विसर्जनरहितं पूर्णाहुतिं कृत्वा । पुष्पयागादनन्तरं अग्निस्थं देवं मण्डले विसृज्य । मण्डलस्थं देवं महाकुम्भे उद्वास्य । महा कुम्भस्थं देवं मूलबेरे नियोज्य । उपकुम्भाधिदेवतानां देवस्य पादमूले सम्योज्य । करकस्थं देवं द्वारे उद्वास्य।

**कर्मणामनसा वाचा या चेष्ठा मम नित्यशः।**

**केशवाऽऽराधने सा स्यात् जन्मजन्मान्तरेष्वपि।**

**उपचारापदेशेन कृतान् अहरहर्मया।**

**अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम।**

इति देवेशं प्रार्थ्य । सायाह्नकाले देवताऽऽवाहनं कुर्यात् ।

*******************************************

## भेरी ताडनं

(देवताऽऽवाहनं)

देवस्य पुरतः धान्य पीठे भेर्यादि वाद्यानि निक्षिप्य। सर्वत्र पुण्याह जलेन प्रोक्ष्य फलानि नैवेद्य। नीराज्य। प्रथमतः आचार्यः स्वयमेव ताडयित्वा। तदनन्तरं पारशवेन करेण ताडयित्वा। आचार्यः।

नर्तन युक्तो नर्तनयुक्तो नादब्रह्म स्वरूप निरूप निष्कळ हरिं।
स्मृतिकृतियुगळं स्मृतिकृतियुगळं फणिपति यन्त्रं मध्यममाकाशं ।
वामे रुद्र तरम् मध्ये ब्रह्माणतरम् वासुकि पाशं ।
दिनकर सितकर वदनं पटहम्पटहं ताडय ताडय चंचुत्पुटितं चाचूपुटितं आवाहित तृप्तिकर ताळोयम् । तत्तत् ।

श्री शैलेश दयापात्रम् धीभक्त्यादि गुणार्णवम्।
यतीन्द्र प्रवणं वंदे रम्यजामातरं मुनिम्।

शुक्लाम्बरधरं विष्णुं शशि वर्णं चतुर्भुजम्।
प्रसन्न वदनं ध्यायेत्सर्वविघ्नोपशान्तये।

वन्दे लक्ष्मीपतिं देवं शङ्ख चक्र गदाधरम्।
विद्या मूर्तिं हयग्रीवं शब्दार्थ ज्ञान लब्धये।
अमृतात्मातमेघाभं अमृताहरणं विभुम्।
पांचरात्राऽऽगमाचार्यं वन्दे वैकुण्ठ भूपतिम्।

नमस्सकल कल्याण दायिने शेष शायिने।
निर्मलानन्द कल्याणनिधये विष्णवे नमः।
नमस्सकलकल्याणदायिने चक्रपाणये।
विषयार्णवमग्नानां समुद्धरणहेतवे।

भगवच्छास्त्रतत्वज्ञं भगवत्पाद संश्रितम्।
वन्दे शाण्डिल्यमाचार्यं पौण्ड्रवर्धनस्थलोद्भवम्।
भगवच्छास्त्रतत्वज्ञं औपगायन देशिकम्।
तोताद्रिसंभवं वन्दे वासुदेवपदाश्रितम्।
अनन्तपुरसंभूतम अनेक गुणभूषितम्।
प्रपद्ये भगवच्छिष्यं मौञ्ज्यायन गुरूत्तमम्।
वासुदेवकृपापात्रं पञ्चरात्रविशारदम्।
मृगस्थलसमुत्पन्नं प्रपद्ये कौशिकं गुरुम्।
भारद्वाजाख्यमाचार्यं विष्णोःपादाब्ज संश्रितम्।
प्रपद्ये सुगुणाम्बोqध सालग्रामाऽचलोद्भवम्।
पञ्चरात्रार्थतत्वज्ञान् पञ्चसंस्कार शालिनः।
पञ्चाचार्यान् प्रपद्येहं पाञ्चकालिकतत्परान्।
वेदाःसर्वे विवर्धन्तां देवाःसर्वे सवासवाः।
वर्धन्तां वैष्णवाःसर्वे वर्धन्तां ब्राह्मणास्सदा।

इति त्रिवारं स्वयमेव ताडयित्वा।

भुज वीर्यपराक्रान्तो वैरि पक्षो महाद्युतिः।
वर्धन्तां भूपतिर्नित्यं सामात्यस्सपुरोहितः। इति त्रिः।

लक्ष्मीशोत्सवसेवार्थम् आगता मुखबाहुजाः।
ऊरू पाद समुद्भूताः अनुलोमाश्च धार्मिकाः। इति त्रिः

स्वकर्म निरताः सर्वे दातारस्सत्यवादिनः।
इतरे मानवास्सर्वे पुत्र पौत्र धनाधिपाः।
शतायुषश्च वर्धन्तां नीरोग निरुपद्रवाः। इति त्रि वारं।

सुवाहन सुशक् शक्तिः तिष्ठन्नित्यं पृथक्पृथक्।
ईशानश्चैव पर्जन्यो जयन्तश्च महेन्द्रकः।

आदित्यस्सत्यकश्चैव भृगुश्चैवाऽन्तरिक्षकः।
अग्निःपूषाविधाता च राक्षसाश्च यमस्तथा।
गन्धर्वो भृङ्गराजश्च ऋषयः पितृदेवताः।
दौवारिकश्च सुग्रीवो पुष्पदन्तो बलादिकः।
असम्सोषाश्च विहितो वायुर्नागस्तथैव च।
आद्रपुल्लाटकश्चैव सोमश्चैव बृगुस्तथा।
अदितिश्च दितिश्चैव द्वात्रिम्शद्वाह्य देवताः।
विन्ध्यस्सह्या महेन्द्रश्च ततश्श्रीघट्टनो गिरिः।
माल्यवान्मलयश्चैव किष्किदो रामपर्वतः।
श्रीगिरिश्चित्रकूटश्च दशैते पर्वतास्तथा।
यक्षाश्च गुह्यकाश्चैव तथा किम्पुरुषस्तथा।
पिशाचाऽप्सरसश्चैव गन्धर्वो किन्नरास्तथा।
विद्याधराश्च एवैते आगच्छन्तु महोत्सवे।

## 1. कुमुदः

प्रागाशाभिमुखो महागज गतो नेत्र त्रयाब्जोज्वलः।
पञ्चाशत्करिणांगणैः परिवृतो शुभ्रश्चतुर्भिर्भुजैः।
वज्रं चक्र मथांजलिं च कुमुदः बिभ्रद्विभूषोज्वलः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

कुमुद ताळ मिहोच्यते

विमलशशि रुचि मुषित मुरमय वारणम्भववारणम्।
मकुट धर मणि कुलिशभुजरुचि रञ्जलिम् रजिताञ्जलिम्।
अरुण निवसन मयुख विलसित लोचनं भवमोचनम्।
भजत परिमिह कुमुद मिति जननामकं गण नायकम्। तत्तत्।

कुमुदस्य मङ्गळ ताळम्। षड्म स्वरम्। गौळ रागम्। विलासनृत्तम्।

## 2. कुमुदाक्षः

हेमाभो महिषासनस्त्रिनयनो श्यामाम्बरो भासुरो।
देवोसौ कुमुदाक्षकः परिवृतो दैत्यैः पितृणाङ्गणैः।
बिभ्रन्मुद्गर खड्ग यष्टि मनिशं युद्धोत्सुखैः स्वैर्भुजैः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

<u>कुमुदाक्ष ताळ मिहोच्यते</u>

पृथुलनिजभुज विद्दत शनिवर खड्ग मुद्गर यष्टिकम्।
मकुट विलसित हरितमणिघण शातकुम्भनिभाकृतिम्।
निखिल दिति सुत विहित रतिमति भीमसैरिभवाहनम्।
नमत सित रुचि जलज विरचित नामकं गणनायकम्। तत्तत्।
कुमुदाक्षस्य बद्धाव ताळम्। ऋषभस्वरं। भूपाळ रागं। सर्वतोभद्रनृत्तं।

## 3. पुण्डरीकः

रक्ताभो हयवाहनस्त्रिनयनो श्यामाम्बरो भासुरो।
दोर्भिर्बिभ्रदथाञ्जलिंच मुसलं चक्रं च भूषोज्वलः।
पैत्रैः क्रूर महागणैः परिवृतः श्री पुण्डरीकाह्वयः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

<u>पुण्डरीक ताळ मिहोच्यते</u>

अरुण कपिशित विलसदनुभव रोचिषं रुचिराननम्।
विमल शशि मुख कमल मरुतर घोटकोपरिवासिनम्।
सतत कर तल विद्दत विलसित चक्र मौसल मञ्जलिम्।
नमत परिमिह कपिश मृदुतर वाससं शुभ वाससम्। तत्तत्।
पुण्डरीकस्य भृङ्गिणीताळम्। गान्धारस्वरम्। बिलहरि रागम्। केतार नृत्तम्।

## 4. वामनः

कुंदाभश्शकटासनः त्रिनयनो नीलाम्बराऽलङ्कृतः।

वज्रं शूलमधोभुजैःदरोधरैः मुष्टिं च भूषोज्वलः।

रक्षो नाथ गणै वृतो बहु मुखै श्री वामनाख्यो विभुः।

तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

**<u>वामन ताळ मिहोच्यते</u>**

समय विलसित कुसुम परिमळ कुन्द पुष्पपरिच्छदम्।

महित विघटित कनक रथ वर सुस्थितं सुमनोहरम्।

कनक गिरि निभ पृथुल निजभुज वज्र शूल समुष्टिकम्।

नमत परिमिह कपिश मृदुतर वाससम् बहुलोचनम्। तत्तत्।

वामनस्य मल्ल ताळम्। मध्यम स्वरम्। केतार रागं।चक्र मण्डलनृत्तम्।

## 5. शङ्कुकर्णः

पीताभो बहुभूषणःत्रि नयनो व्याघ्रासनो माल्यवान्।

पाशंचाङ्कुश मञ्जलिं च सततं बिभ्रश्चतुर्भि र्भुजैः।

भूतानां बहुसङ्कैः परिवृतः श्रीशङ्कुकर्णाह्वयः।

तीर्थान्तोत्सवसेवनार्थमधुना क्षिप्रं समागच्छतु।

**<u>शङ्कुकर्ण ताळ मिहोच्यते</u>**

कपिशतनुरुचि विततविलसित दीपिकाऽखिल दिङ्मुखम्।

चलित घन घनविपिन परिवृड वाहन स्तिथि दीक्षितम्।

अमितबुजबल विधृत कर वर पाशमंकुश मञ्जलिम्।

नमत परिमिहमतुलमिह भुवि शङ्कु कर्णसमाह्वयं। तत्तत्।

शङ्कुकर्णस्य मङ्गळताळं। पंचमस्वरं। आरभिरागं। कान्तार नृत्तं।

## 6. सर्व नेत्रः

धूम्राभो मृगवाहनस्त्रिनयनो श्यामाम्बरो भासुरो।
दोर्भिष्टङ्क परश्वधौ च सुवहन्मुष्टिं च पाशं वहन्।
नागानां बहुभिर्गणैः परिवृतःश्री सर्व नेत्राह्वयः।
तीर्थान्तोत्सवसेवनार्थमधुना क्षिप्रं समागच्छतु।

<u>सर्वनेत्र ताळ मिहोच्यते</u>

कपिश सुर विल (स)दरुण सरसिज लोचनं बहु लोचनं।
असित समधिक महित जल धर रूरुको परि सुस्थितं।
सतत कर तल विधृत विलसित टङ्क पाश परश्वधम्।
नमत परिमिह कपिश मृदुतर सर्वनेत्र समाह्वयं। तत्तत्।
सर्वनेत्रस्य जय ताळं। दैवत स्वरं। धन्यासि रागं। पृष्ठकुट्टिमनृत्तं।

## 7 सुमुखः

श्यामाभो मृग राज वाहन गतो नेत्र
त्रयाब्जोज्ज्वलः।
हस्तैः शक्तिरथाङ्गमञ्जलिञ्च सुमखो बिभ्रद्विभूषोज्वलः।
भूतानां शत पालकैः परिवृतः कृष्णांशुको भासुरो।
तीर्थान्तोत्सवसेवनार्थमधुना क्षिप्रं समागच्छतु।

<u>सुमुख ताळ मिहोच्यते</u>

निशित कर तल नखर विलसित पंचवक्त्र निवासिनम्।
पृथुल शतमख विमल मणिगण सोदरोज्वल विग्रहं।
अरुण मणिगण सदृश निवसन वेष्टितोधर बन्धनं।
सुमुख मभजत मकुट मणि घण रञ्जिताखिल विग्रहं। तत्तत्।
सुमुखस्य भद्र ताळं। निषादस्वरं। सावेरि रागं। कान्तमोहन नृत्तं।

## 8 सुप्रतिष्ठः

राजावर्त समान कान्ति निचयो व्यालासनो भीषणो।
हस्तैः कुन्त वरार्गुळं वरगुणो मुqष्ट च पाशं वहन्।
नागानां बहुभिर्गणैः परिवृतः श्रीसुप्रतिष्ठाह्वयः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रंसमागच्छतु।

**सुप्रतिष्ठ ताळ मिहोच्यते**

विमल शशि मुख विलसदुरतर पन्नगोपरि सुस्थितं।
पृथुल शतमख हरित मणिगण सोदरोज्वल विग्रहं।
अरुण मणिगण सदृश सुवनश वेष्टितं बहुलोचनं।
भजत करदृत परिग विलसित सुप्रतिष्ठ समाह्वयं। तत्तत्।
सुप्रतिष्ठस्य डक्करी ताळम्। दैवत स्वरम्। शुरुट्टिरागम्।कुटिलबन्दन नृत्तं।

## 9. ब्रह्मा

ब्रह्मास्वर्ण निभश्चतुर्मुखलसन् नेत्राष्टकाऽलङ्कृतः।
पाणिः प्रस्फुरिताक्ष सूत्र करकः पिङ्गैर्जटामण्डलैः।
देवैरुज्वलसिद्ध चारणगणैः हम्साधिरूडो हरेः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

**ब्रह्म ताळमिहोच्यते**

अण्डमण्डल कोटिमण्डल नाभिपङ्कजविष्टरम्।
अण्ड पिण्डचराचराऽखिल देवराक्षससर्गिणम्।
कम्स वैरिपदाब्जचिन्तन हम्सचित्त चतुर्मुखम्।
भेरि ताडनडम्बरानुग ब्रह्मताळमिदम्भजे। तत्तत्।
ब्रह्मस्य द्रुव ताळं। निषाद स्वरं। हम्सध्वनि रागं। बुजङ्ग नृत्तं।

## 10. इन्द्रः

मेघश्यामतनुः सहस्र नयनो वज्रायुधोवासवो।
नागेन्द्रोन्नत पीन गन्धर गतोदेवावळी सेवितः।
भेरी मद्धळ झल्लि काहळरवैः पूर्णाऽखिलांशो हरेः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

<u>**इन्द्रताळमिहोच्यते**</u>

सकल सुर गण मकुटमणिगणरञ्जिताङ्घ्रि सरोरुहं।
दनुजविभुदनि करविराजित वज्रशक्ति शचीपतिं।
रजत गिरिरिव विलसदितिमदहस्तिमस्तक निष्ठकं।
विधृत करटिक पटह विलसितं इन्द्रताळमिदं भजे। तत्तत्।

इन्द्रस्य सम ताळं। मध्यम स्वरं। कल्याणि रागं । विलास नृत्तं।

## 11. अग्निः

वह्नि शक्तिधरः प्रवाळविलसन् देहप्रभामण्डल:।
ज्वालाजाल परीतरत्नमकुट: कल्याणपीताम्बर:।
भूषारत्न मरीचिमांसळ रुचि: मेषाधिरूडो हरे:।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

<u>**अग्निताळमिहोच्यते**</u>

लोक हितानु गतागतिहव्यक वाहक दीप्तपदं।
वाहनमेषज वाधिकरोहण वायुगतिम्वरदं।
ज्ञान समाधिकृतानुगताखिल कारणवायुसखं।
भेरिकताटन ताळविभेदित पावक ताळमिदं। तत्तत्।

अग्नेः अट ताळम्। सिंहलीला स्वरम्। तोडि रागम् । सर्वतोभद्र नृत्तम्।

## 12. कालः (यमः)

कालः पाश धरः प्रभूतितिमिरः श्यामादिकाळाङ्गको।
ज्वाला रूक्ष कटाक्षतीक्ष्ण वदनः दम्ष्ट्रार्चिमग्नाधरः।
आरूडोमहिषं विषाणकुलिशं प्रेतैरुपेतो हरेः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रंसमागच्छतु।

**<u>काल ताळमिहोच्यते</u>**

काल धूतप(ति) कालमेघनि(भ) कालपाशविराजितम्।
काल चक्रग(ति) कालचक्रकृ(ति) कालकालमहत्तनुम्।
काल केतुघ(न) कालहारिव कालपूजकसत्प्रियम्।
भेरिकानुग(त) ताळभेदित(म) कालताळमिदं भजे। तत्तत्।
यमस्य शुद्ध ताळम्। मट्टय स्वरम्। काम्बोदि रागम्। जानुनि नृत्तम्।

## 13. नैऋतिः

रक्ताक्षो रक्तकेशः कनकरुचि तनुः खड्गखेटाङ्ग हस्तो।
निर्द्वन्द्वो न्द्वो रजनीचरोत्तमपतिः दंष्ट्राकराळाङ्गकः।
आरूडो नरवाहनः परिवृतो दैत्यैरुपेतोहरेः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

**<u>नैऋति ताळमिहोच्यते</u>**

अक्षयपक्ष विपक्षबलद्वय दक्षिणनैऋरुचिम्।
शिक्षित भक्षितवैरिविचक्षण निर्झितनिर्झरकम्।
सर्ग निसर्गकरद्वय वर्गकवर्गवपुर्गळणम्।
नित्य नितान्तनिरन्तरसन्तत नैऋतिताळमिदम्। त्तत्तत्।
नैऋतेः जय ताळम् । मट्टय स्वरम्.। भैरवि रागम्। कमलबंध नृत्तम्।

## 14. वरुणः

आरूडोमकरं महोदधिभवं मन्दारमालोज्वलः।
पाशाऽलङ्कृत पाणिपद्मशुभगः सम्सेवितःकिन्नरैः।
कुन्देन्दुद्युतिमान् स्वदेहरुचिना ध्वस्थान्धकारो हरेः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रंसमागच्छतु।

<u>वरुण ताळ मिहोच्यते</u>

मकरवाहनमब्धिसम्भव कल्पपुष्प विभूषणम्।
पाशशोभित पाणिपङ्कज शोभमानकळेभरम्।
कुन्दसन्निभदेहकान्ति निराकृताखिलशर्वरम्।
मकर परिभृडवाहनं जगदेककुम्भकनायकम्। तत्तत्।
वरुणस्यभद्रताळम्। अमृतवर्षिणि रागम्। अन्तराळ नृत्तम्। दैवतस्वरम्.

## 15. वायुः

वायुःवह्निसख प्रसन्नवदनः पिङ्गायताक्षि द्वयो।
धूम्राभो मृगवाहनो परिलसत् पाणिद्वयाऽलङ्कृत:।
पीनोदार भुजान्तराळ विलसद्धामाभिरामो हरे:।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

<u>वायु ताळ मिहोच्यते</u>

धिमित धितिसुत युवतिकुचतट घटितकुङ्कुमहारिणम्।
सतत गतिमिहसकल जगदभिरक्षणोत्सुखमानसम्।
विकच सुरतरु बहुळपरिमळ कुसुमदामविराजितम्।
वायुघोषण भेरिताडन वायुताळमिदं भजे। तत्तत्।
वायोः झंप ताळम् । श्री रागम् । षड्गमस्वरम्- पृष्ट कुट्टिम नृत्तम्।

## 16. कुबेरः

सोमस्सुंदरलोचनःत्रिपुरजिन् मित्रश्चलःकुण्डलः।
श्वेताभश्शुकतुण्ड रक्तवदनः पाणिस्थ पद्मोज्वलः।
आरूडोस्त्वरितं तुरङ्गमपरं यक्षैरुपेतो हरेः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

<u>सोम ताळमिहोच्यते</u>

उद्यद्दिनकर किरणप्रहसनदक्षिण नैर्ऋरुचिम्।
दीप्यद्दशमुख नृत्यद्भुजबल तक्षकयक्षपतिम्।
नीलसुलोहित मैतृकशोभित हेमतुल्यकळेभरम्।
शङ्क पद्ममुखेश्वर शिव भूबृन्दावसदेश्वरम्। तत्तत्।
सोमस्य मङ्गळ ताळम्। मोहन रागम्। मङ्गल नृत्तम्। षड्गमस्वरम्..

## 17. ईशानः

ईशश्शूलधरःत्रिलोचन धरः शार्दूल चर्माम्बरः।
भूत प्रेतपिशाच राक्षसगणैः युक्तःप्रवाळाद्युतिः।
आरूडो वृषवाहनं शशिलसच्छूडाभिरामो हरेः। .
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रं समागच्छतु।

<u>ईशान ताळ मिहोच्यते</u>

शङ्करं प्रथमकिङ्करं भुजगभूषणं गिरिजापतिम्।
हेमशैल धनुरूर्जित पाणिकमिन्दुशेखरशोभितम्।
शूल कपाल विराजितमुज्वल गङ्गाशोभित जटाधरम्।
उमयासहितं सम्हारपतिम् भक्तजनोत्तम नटनाथम्। तत्तत्
ईशानस्य मङ्गळ ताळम्। शङ्कराभरण रागम्। ताण्डवनृत्तम्। वृषभस्वरम् ।

## 18. गरुडः

पक्षा धूतन संभृतै प्रतिभट तनूच्छाटयन्मारुतेः।
भूषारूप धरैः भुजङ्कमपरैः सम्सेवितः किन्नरैः।
देवो विष्णुरथः प्रचण्डबलवान् श्रीवैनतेयोविभुः।
तीर्थान्तोत्सव सेवनार्थमधुना क्षिप्रंसमागच्छतु।

